॥ श्री ॥

# ॥ पञ्चमः सर्गः ॥

:॥१॥५०॥ श्रीगणेशाय नमः॥ श्रीमन्नृसिंहाय नमः ॥

अथानन्तरं पञ्चमः सर्गः प्रारभ्यते। तस्यायमादिमः श्लोकः।

यावदागमयतेऽथ [1]नरेन्द्रान् स स्वयंवरमहाय महीन्द्रः।

तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥१॥

तावदेव तस्मात् कालात् प्रथमत एव, तस्मिन् एव काले वा, नारदनामा ऋषिः कालत्रयदर्शी सत्यवचास्त्रिदशधाम जगाम, [2]स्वर्गं गतः। भूमेः सकाशात् पातालाद् वा। तावत् किम्? यावदित्याह। यावत् स महीन्द्रो भीमोऽथ मङ्गलपूर्वं स्वयंवरमहाय निज-सुतापतिवरणमहोत्सवाय नरेन्द्रान् राज्ञ आगमयते आगच्छतः प्रतीक्षते। आगच्छति कश्चित् तमन्यः प्रयुङ्क्ते इति हेताविन् [ ] ।गामिन् [3]क्षान्तावित्यात्मनेपदम् ॥१॥

नात्र चित्रमनु तं प्रययौ यत्पर्वतः स खलु तस्य सपक्षः।

नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥२॥

अत्रार्थे न चित्रमाश्चर्यम्। अत्र कुत्रेत्याह। यत् पर्वतो नाम मुनिस्तमनु प्रययौ, तस्य पश्चात् प्रस्थितः। खलु यस्मात् स पर्वतस्तस्य नारदस्य सपक्षः सगोत्रः, कनीयान् भ्रातेति। केचित् [4]ज्येष्ठो हि सगोत्रः कनीयसा सगोत्रेणानुगम्यत एव। तु पुनर्नारदो मुनिर्जगतो गुरुर्विश्वस्य मान्य उच्चैर्विस्मयाय महत आश्चर्याय गगनं विललङ्घे व्योमातिच[5]क्राम। एतन्महदाश्चर्यमखिलजगज्जनमान्योऽपि सन्नारदो लघीयानिव दिव-मुत्पपात, सर्वैरपि हि स एवोपगन्तव्यः। नारदः किल कलिदर्शनव्यसनितया निजं महिमानमविगणयन् पर्वतसहितस्त्रिभुवनं बंभ्रम्यते। तच्च तस्य न युज्यतेऽतोऽत्र महच्चित्रम्। अथ चार्थान्तरम्। — पर्वतो गिरिर्यत्तमनुप्रययावत्र न चित्रम्। यतः स सह पक्षैर्वर्तते,। सपक्षः पतत्रसहितः। पक्षवतः पर्वतस्य ह्यनुयानं युक्तम्। तु पुन-र्नारदो जगतस्त्रिभुवनात् सकाशात् गुरुर्महानधिकतरः स्वल्पित्वाश्चर्यहेतवे स्वमतील-वान्। गरीया-[१०४.७]-न् पदार्थो वज्रशिलादिमयः पर्वतादिः पक्षादिसाहायकं विना दूरतरं [6]नभो वर्त्मातिक्रामतीति भूयस्तरमाश्चर्यम् ॥२॥

गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे।

साधके हि नियमोऽन्यजनार्थं योगिनां तु तपसाखिलसिद्धिः ॥३॥

1. B1, 8- महीन्द्रान्. 2. B1. स्वाङ्गितः 3. B1. क्षान्त्याम्. 4. B1. ज्येष्ठे. 5. B1. चक्रमे. 6. B1. नतो.

तेन मुनिना नारदेन मार्गे व्योमपथानं वर्जयित्वैव स्वं सर्वं श्रान्तम्। युक्तोऽयमर्थः। हि यस्मात् साधक उपकरणनिमित्ते परलोककृते नियमोऽवश्यं भावः अन्यजनार्थं योगिनां तु सिद्धानां तपसा सुकृतमहिम्नैवाखिलस्य समग्रस्य सिद्धिर्निष्पत्तिर्भवति। अन्ये हि राजराजपुत्रादयो दूरदेशप्रवेशा[1](प्रवासा)द्यर्थं तुरगाद्यपेक्षन्ते, सुकृतिनस्तु सुकृतबलेनैव सर्वं कार्यं सम्पादयन्तीति साधकशब्देनात्र मूर्तं विवक्षितं तपसस्त्वमूर्त-साधनत्वं, तपोबलेन यद्यन्मनसि चिन्तयन्ति, तत् तत् तेषां सर्वं सिद्धमेव दृश्यत इत्यर्थः॥३॥

खण्डितेन्दु[2]भवनाद्यभिमानान् लङ्घते स्म मुनिरेष विमानान्।

अर्थितोऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥४॥

एष मुनिर्विमानान् देवगृहादिधिष्ण्यान्यतिक्रामति स्म। कीदृशान्? खण्डितश्छिन्न इन्दु[3]भवनादीनां चन्द्रमण्डलध्रुवमण्डलादीनामभिमान उच्चैस्तरत्वगर्वो यैस्तान्। तदुपरिष्टाद् वर्तमानानित्यर्थः। ननु स तत्र किं न क्षणमपि विश्रान्त इत्याह। तेषां विमानानां पतिभि-रङ्घ्रिविनम्रैः पादपतितैरर्थितो विश्रम्य गम्यतामिति सप्रश्रयं याचितोऽप्यतिथितामतिथिभावं नैवानुमेने नैवाङ्गीचकार, कार्यस्य कालासहत्वात्। प्रसाद्याऽद्याऽतिथीभूय गम्यतामिति भूयो भूयोऽवगृहीतोऽपि वैमानिकैरग्रे प्रचलित एवेत्यर्थः ॥४॥

तस्य तपनभिया तपनः स्वं तावदेव समकोचयदर्चिः।

यावदेव दिवसेन शशीव द्रागतप्यत न तन्महसैव ॥५॥

सामान्येनोक्त्वा विशेषमाह। तपनः सूर्यस्तस्य नारदस्य तापनभिया तापभयेन तावदेव झटिति स्वमर्चिर्निजां भासं समकोचयत् संवृणोति स्म। ममार्चिरेनं मुनिं मा तापयत्विति विमृश्य तावत् प्रथमत[4] एवोष्णरश्मिस्तत् संचिक्षेप। तावत् किम्? यावदित्याह। यावद् द्राग् झटिति स तपनस्तस्यैव मुनेर्महसा तपोमयेन धाम्ना प्रतीपं [5]नातप्यत, न तापितः। नारदो हि यदि कथमपि केनापि तापितस्ततस्तपो-ब्रह्ममयेन तेजसा द्रुतं तं भस्मभावं नयति ॥५॥

पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम्।

पर्यभूत्खलु करैर्द्विजराजः कर्म कः स्वकृत-[108.6]-मत्र न भुङ्क्ते ॥६॥

खलु नूनं द्विजराजो विप्रश्रेष्ठो नारदस्तदा तस्मिन्नवसरे तेन कारणेन तं दिनमणिं करैस्तेजोभिः करैर्बलिविशेषैर्वा पर्यभूत् परिभवति स्म। तेन केनेत्याह।

1. B1. दूत-. 2, 3. B1. -भुवना-. 4. B1. उष्ण- 5. ४. -ताप्यत.

यद् दिनमणिर्द्विजराजं विधुभोढं करैर्बलिग्रहणैः पर्यभूत्। तत्त्वतस्तु द्विजराजश्चन्द्रः, करा रश्मयः। युक्तोऽयमर्थः। इह जगति स्वकृतं निजार्जितं कर्म शुभाशुभलक्षणं को न भुङ्क्ते? अपि तु सर्वः कोऽप्युपलभत एव। नारदस्यैष एव सूर्यस्य बलिग्रहणकृतः परिभवो यत् तस्य श्रुतं स्वार्चिःसङ्कोचनम्। दण्डो हि बहुविधो भवति। वाग्दण्डादि-भेदेन करग्रहणमपि क्वापि ब्राह्मणादावपराधयति। दण्ड एव बलिहस्तां शवः कराः। सूर्यमण्डलं क्वापि चन्द्रमण्डलादुपरि कथ्यते ॥६॥

विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घमथ कच्छरुहाभिः।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥७॥

स्वर्गसिन्धुर्देवनदी। अस्मै अतिथये गृहागताय स्नातकाय तटे वर्तमानाभिः कुशानां दर्भाणामालिभिः [1]श्रेणिभिर्विष्टरमासनं ददौ। नद्यास्तटे बहुभिर्दर्भैरुह्यते। अद्भिः स्वैरेव जलैः पाद्यं पादार्थमुदकं [2]कोष्णं ददौ। अथ पश्चात् कच्छरुहाभिर्दूर्वाभि-रर्घं पूज्यां ददौ। पद्मानि कमलानि, तेषां वृन्दं वनं, तस्य मधुभिर्मधुपर्कं दधिमधु-घृतलक्षणमदितेति दीपकम्। अतिथ्यादिनामयमेवंविधः सत्कारः कल्पप्रसिद्धः। स्वर्ग-गङ्गायां स्नातुमयं कियन्तमपि कालं विलम्बितो, नदी किलास्नात्वैवातिक्रान्ता महत्या तकमुपजनयति, नदीं प्रत्याशान्तं पुमांसमवलोक्य तर्पणपूजाद्यर्थिनो देवाः पितरश्च प्रथमत एव तत्र गत्वोपविशन्ति। अतस्तत्राकृते [3]स्नाने तर्पणाद्यभावात् ते निराशा भवन्ति शपन्ति च तमिति। मधु मकरन्दः क्षौद्रं च ॥७॥

स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप।
सम्प्रतीर्य भवसिन्धुमनादिं ब्रह्म शर्मभरचारु यतीव ॥८॥

स मुनिरनन्तरं नभोमध्यमतिक्रम्य नाकनायकस्येन्द्रस्य निकेतनं सद्म लेभे। अनादिमा[4]रम्भरहितं संसारसागरं सम्यक्प्रकर्षेण तीर्त्वा समुल्लङ्घ्य यती योगवान् ब्रह्मामृतत्त्वलक्षणं परं तत्त्वमिव। कीदृशं? द्वयमपि शर्मभरेण सुखातिरेकेण चारु रुचिरम्। इन्द्रभवने शर्म विषयजं ब्रह्मणि तु परमानन्दः प्रसिद्ध एव ॥८॥

अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृतातिथिमिन्द्रः।
यावदर्हकरणं किल साधोः प्रत्यवायधृतये न गुणाय ॥९॥

[5]इन्द्रस्तं मुनिमतिथिं गृहा-[101]-गतं सन्तं चारु सम्यक् सदकृत सत्कुरुते स्म।

---

1. B1. सृणिभिः 2. B1. कौष्णं 3. B1. स्नाति. 4. B1. आरम्भतरहितं. 5. B1. इन्द्रं.

काभिः कृत्या ? अर्चनाभिः पूजाभिः। कीदृशीभिः ? उचिताभ्यो योग्याभ्यः सकाशादधिके-
-च्छाभिः। या तत्र युज्यते पूजा ततो बहुना भूयसीभिः। ननु विहिताधिककरणे
को विशेष इत्याह। किलेत्यागमे साधोर्महात्मनः पूज्यस्य यावत् प्रमाणमर्हमुचितं
तस्य करणं सम्पादनं प्रत्यवायधुतये दूषणध्वंसाय भवति न गुणायोपकाराय। यस्य
यावदवश्यकर्तव्यं तच्चेत् तस्य न क्रियते, तदा प्रत्यवायो भवति, तदधिककरणत एव
गुणः सुकृतलाभः। अत इन्द्रेण नारदोऽतिथीभूतो भूयस्तरमादृतः ॥९॥

नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाद्रियत द्राक् ।

पर्वतोऽपि लभतां कथमर्चां न द्विजः स विबुधप्रभुलम्भी ॥१०॥

अनन्तरमद्रिभिद् गोत्रभिदिन्द्रो द्रागद्रायाद्रेर्गिरेर्नामधेयसमतासखं नामसाम्यसुहृदं
मुनिं पर्वतमाद्रियत सत्करोति स्म। अद्रेरपि पर्वत इति नाम मुनेरपि एवं च द्वयोर्नाम-
-साम्यकृतं सख्याम्। ननु योऽद्रिं भिनत्ति तस्याद्रेः सखापि भेत्तुं युज्यते, न त्वादर-
-विषयीकर्तुमित्याह। स द्विजोऽपि ब्राह्मणोऽपि पर्वतः अर्चां पूजां कथं न लभताम् ?
अपि तु सर्वथा प्राप्नोतु। कीदृशः ? विबुधप्रभुं सुरपतिं लभते प्राप्नोत्येवंशीलो विबुध-
-प्रभुलम्भी। अयं हि ब्राह्मणो नाममात्रेणैव पर्वतोऽद्रेः कथमिव संबन्धी येन
देवराजतोऽप्ययं सत्कारं आसादयति। न हि तस्याद्रिभित्त्वं तदा, किन्तु देवराजत्वम्।
तस्य च पर्वतत्वं न मुख्यं, किन्तु ब्राह्मणत्वमेव। अथ चार्थान्तरम्।

स द्विजो ब्राह्मणः पर्वतः पर्वण्यपि विबुधप्रभुलम्भी विद्वत्पत्तिं प्राप्य, पूजां
दक्षिणादानादिकृतं सत्कारं कथं न लभताम्। ब्राह्मणस्य हि विद्वत्पत्तिमुपगतस्य
तस्मात् सदैव पूजा युक्ता। पर्वसु च संक्रान्त्यादिषु युक्तैव। अपिशब्दोऽत्र विद्वत्-
-पतितः सर्वकालं ब्राह्मणस्य पूजां गमयति ॥१०॥

तद्भुजादतिवितीर्णसपर्यात् द्योद्रुमानपि विवेद मुनीन्द्रः।

स्वःसहस्थितिसुशिक्षितया तान् दानपारमितयैव वदान्यान् ॥११॥

मुनिन्द्रो नारदो द्योद्रुमान् कल्पवृक्षानपि स्वःसहस्थितिसुशिक्षितया स्वर्गसहवास-
-सद्भ्यस्तयैव दानपारमितया दानपारगमनप्रतिपादकबौद्धग्रन्थविशेषेण वदान्यान्
स्थूलदातॄन् विवेद जज्ञौ। कस्माद् गुरोः सुशिक्षितयेत्याह। तस्येन्द्रस्य भुजाद्बाहोः।
कीदृशात् ? अत्यधिकं वितीर्णा दत्ता सपर्या पूजा येन तस्मादिति पूजायाः कामित-
-वि-[107.6]-षयं बहुत्वं प्रतिपादितम्। भुजशब्देनात्रोपचारात्त पाणिः पूजोपकरणस्य

गौरवेण भुजस्य प्रयत्नाधिक्यात् तस्यैव वा प्राधान्यम्। गोशब्दवत् द्योशब्दोऽ-
-प्योकारान्तः[1] स्वर्गपर्यायोऽस्ति। पारमिता नाम बौद्धग्रन्थविशेषः। अन्योऽपि शिष्य
एकस्थाननिवासेन विद्यां सम्यगभ्यस्यति। शतपारमितेति श्लेषव्याख्यानकल्पनेन
क्लिष्टकल्पना न चमत्कृतिकृदित्युपेक्षितैव सा ॥११॥

मुदितान्यजनसंकथनः सन्नादरं बलरिपुः समवादीत्।
आदरः स्वपरभूरिकथानां प्रायशो[2] हि सुहृदोः सहवासः ॥१२॥

बलरिपुरिन्द्रो निषिद्धापरलोकसमालापो भवन् मुनिं सम्यगवोचत्। युक्तोऽयमर्थः।
हि यस्माद् द्वयोः प्रीतयोः सहवास एकत्रावस्थितिः स्वपरभूरिकथानां निजान्यविविध-
-वार्तानामाकर उत्पत्तिक्षेत्रम्। द्वौ सुहृदौ चिरादेकत्रमिलितौ सर्वमन्यत् कृत्यजातमना-
-दृत्य वार्ताकथनप्रतिकथनसुखमनुभवत इत्यर्थः ॥१२॥

तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम्।
भूभृतां चिरमनागतिहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ॥१३॥

इन्द्रस्तं मुनिमुवाच - किं कर्तुमिच्छुः॥ राज्ञां बहुकालमनागमनकारणं जिज्ञासुः।
कस्यां सत्याम्? आलपनकौतुकितायां कथानामनुपश्चात् कथनं, तेन दूरमतिशयेन
प्रसृतायां विस्तृतायां सत्याम्। आलपन आभाषणे कौतुकं विद्यते यस्या सा वाऽऽ-
-लपनकौतुकी, तस्य भावस्तत्ता तस्याम् ॥१३॥

प्रागिव प्रसुवते नृपवंशाः किं नु सम्प्रति न वीरकरीरान्।
ये परप्रहरणैः परिणामे विक्षिताः[3] क्षितितले निपतन्ति ॥१४॥

नु प्रश्ने। हे मुने! नृपाणां वंशा अन्वयाः प्रागिव पूर्वं यथा वीरकरीरान् शूर-
-तनयप्ररोहान् सम्प्रतीदानीं किं न प्रसुवते, न जनयन्ति। किमिति प्रश्ने। ये वीराङ्कुराः
परिणामे वयःसम्पूर्णभावे परेषां शत्रूणां प्रहरणैः खड्गशल्यभल्लादिभिर्विशेषेण क्षिताः
कृत्ताः सन्तः क्षितितले रणोर्वीपृष्ठभागे पतन्ति शेरते। अथ च नृपयोग्या वंशा
वेणवः प्रधानभूताः अन्ये[4] हि तृणवंशा अपि भवन्ति, तेषां करीरा अङ्कुराः तेऽपि
परिणामे च पाकदशायां पराणि श्रेष्ठानि यानि प्रहरणानि कुठारादीनि तैर्विक्षिताः[5]
सम्यक् कृत्ताः[6] सन्तः क्षितितले निजजन्मावनिसमीपभागे निपतन्ति प्रसरन्ति ॥१४॥

---

1. B1. -रान्तः. 2. ब. प्रायसो. 3. B1. क्षितितत्तले. 4. B1. अन्येऽपि.
5. B1. विक्षताः. 6. B1. कृत्ता.

पार्थिवं हि निजमाजिषु वी-[10.6]-रा दूरमूर्ध्वगमनस्य विरोधि।
गौरवाद् वपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् ॥१५॥

ननु किमिति सङ्ग्रामविषयिणी चर्चा भवता कृतेत्याशङ्क्याह। हि यस्मात् वीरा सुभटाः पार्थिवं [1]पाञ्चभौतिकं निजमात्मीयं वपुः शरीरमाजिषु सङ्ग्रामेष्वपास्य [2]त्यक्त्वा तेजोमयं दिव्यं वपुरास्थाय मया स्वहस्तेन कृता या खल्वतिथिगौरवऋद्धिर्गृहागतादरसम्पत्तिस्तां भजन्ते प्रतीच्छन्ति। ननु पार्थिवं वपुः किमित्याजिषु ते त्यजन्तीत्याह। कीदृशं तत्? दूरमुच्चैर्यदूर्ध्वगमनमुपर्युत्पतनं तस्य विरोधि प्रतिपक्षभूतम्। कस्मात्? गौरवात् महत्त्वात्। गुरु हि प्रस्तरलोष्टाद्युपरि क्षिप्तं सद् गुरुत्वात् दूरं न याति। वपुषः पञ्चभूतात्मकत्वेऽपि मूर्तौ पृथिव्याः प्राधान्यात् पार्थिवमित्युक्तम् ॥१५॥

आभिशापमिव नातिथयस्ते मां यदध भगवन्नुपयन्ति।
तेन न श्रियमिमां बहु मन्ये स्वोदरैकभृतिकार्यकदर्थ्याम् ॥१६॥

हे भगवन्! यस्मात् कारणादध ते वीरा अतिथीभूय न मामुपयन्त्युपगच्छन्ति। कमिव? आभिशापमिव सापवादसदृशम्। अभिशापो ब्रह्महत्यादिजनितोऽपवादः। तेन हेतुनेमां श्रियं विभूतिं निजां न बहु मन्ये, न सम्भावयामि, नितान्तमेतामवगणयन्नस्मीत्यर्थः। यतः कीदृशीम्? स्वस्य निजस्यैवोदरस्य जठरस्यैका केवला भृतिर्भरणं तदेव कार्यं प्रयोजनं, तेन कदर्थ्यां कृपणलक्षणया निन्द्याम् ॥१६॥

पूर्वपुण्यविभवव्ययबद्धाः श्रीभरा विपद एव विमृष्टाः।
पात्रपाणिकमलार्पणमेषां तासु शान्तिकविधिर्विधिदृष्टः ॥१७॥

श्रीभराः सम्पत्समुच्छ्रया विमृष्टा विचारिताः सन्तो विपद आपद एव। यतः कीदृशाः? पूर्वं प्रथमजन्मार्जितं यत् पुण्यं सुकृतं तस्य व्ययः क्षयस्तेन बद्धाः स्थिरीकृताः। अत एव तास्वेतास्वापत्सु सतीषु विधौ वेदे दृष्टः शान्तिकविधिः शान्तिकर्मैषां श्रीभराणां पात्राणां योग्यानां पाणय एव कमलानि पद्मानि तत्रार्पणं न्यासः। [3]श्रीर्हि कमलमासाद्य प्रमोदान्नितान्तमुपचीयते, एवं सति पुनः पुण्यमधिकं भवतीति भावः। यथाऽऽपदापतने[4] हि वेदे शान्तिककर्माणि प्रदर्शितानि सन्ति। अस्यां तु विपद्येष एव शान्तिकविधिस्तत्र दृष्टो वेदव्यवहारविद्भिः ॥१७॥

---

1. ख. पञ्च. 2. B1. त्यक्ता. 3. ख. श्रीर्हि. 4. B1. -पतने.

तद् विमृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाघम् ।
भूयतां भगवतः श्रुतिसारैरथ वाग्भिरघमर्षणऋग्भिः ॥१८॥

तदित्युपसंहारे । हे मुने ! भगवतस्तव पूज्यतमस्य वाग्भिर्गीर्भिरथाघमर्षण-ऋग्भिः पापापनोदकवेदसूक्तैर्भूयतां सम्पद्यतां भगवद्वाचो-[110.b]-ऽधुनाऽ-घमर्षणाख्या ऋचो भवन्त्वित्यर्थः। किं कृत्वा ? सहसाऽतर्कितमेव ममाघं पापं विमृज्योत्पुंस्य । अघस्य पापस्य मार्जनाद्धि अघमर्षणा मन्त्राः। ऋचश्चेदघमर्षण्यः। अघमर्षण्यश्च ता ऋचश्च अघमर्षणऋचः। अत्र सन्धिर्न विवक्षितः। कीदृशमघम् ? संशयशिल्पि सन्देहविनिर्मितम्। संशयकरं वा । कीदृशम् ? स्फीतं प्रवृद्धम् । क्व? अत्र विषये राज्ञां स्वर्गागमस्थाने । सन्देहजनितं ज्ञानं पापमेव । अथवा पापादेव संशयः। वाग्भिः किंवस्तुभिः। श्रुतिसारैः। श्रुतिः श्रवणं श्रोतव्यं वस्तु तत्र सारा स्थिरांशभूताः। भवद्वाचां श्रवणापेक्षया ह्यन्यत्त सर्वं श्रवणं फल्गु । अघमर्षणा-ख्या ऋचोऽपि श्रुतेर्वेदस्य सारभूताः। ते च मार्जनमन्त्राः सम्प्रदायतो ज्ञाप्या अत्र लिखितुं न युक्ताः ॥१८॥

इत्युदीर्य मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां तस्थिवान् मुनिमुखे प्रणिधाय ॥१९॥

मघवा इन्द्र इति पूर्वोक्तमुक्त्वा तस्थिवान् स्थितः। किं कृत्वा ? नेत्राणां सहस्रं निर्निमेषं मुनिमुखे दत्वा । किं कुर्वन् ? अवहितत्वभरेण एकाग्रताधिक्येन विनयर्धिं भक्तिपेशलतासम्पदं वर्धयन्नुपचिन्वन् । विद्यावयोवृद्धेषु नीचैराचरणं विनयः। चक्षुषां दशशतीमिति प्रायोवृत्त्योक्तम् । अनिमेषत्वे सहजसिद्धेऽपि तत्कालं तस्य विशिष्य दृश्यमानत्वात् तदुपादानम् ॥१९॥

वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे ॥२०॥

नारदो मुनिर्हर्षवशाद्गद्गदवर्णवाचा स्मित्वोवाच । यतो विस्मितश्चित्रीयितः। किं कृत्वा ? पाकशासनपदमिन्द्रासनं स्पृशतोऽधितिष्ठतोऽपि तस्य विनये गुरुभक्तौ परिपाकं परिणामं वीक्ष्य । अन्ये लक्ष्मीलवमपि लब्ध्वा दुर्विनीता भवन्ति । अयं तु तादृशेऽप्यैश्वर्ये तथा विनीत इति मुनेश्चित्रम् ॥२०॥

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ ।
तत्फले तव परं यदि हेला क्लेशलब्धमधिकादरदं तु ॥२१॥

हे देवेन्द्र! शतमखी यत्सुकृतं पुण्यं त्वया भिक्षिता याचिता, तस्य सुकृतस्य फले साध्ये स्वविभूतौ निजसम्पदि परं केवलं तव हेला नितान्तम[1]नादरो, नान्यस्य। कीदृशस्य? तव, तस्याः शतमख्याः परिश्रमं खेदं वेत्तीति तस्य। यावता क्लेशेन शतं यज्ञाः समापितास्तं भवानेव वेत्ति। ननु किमत्र[2]चित्रमित्याह। तु पुनः। क्लेशलब्धं स्तोकमपि [3]वस्तु [4]बहुयत्नदं भवति। शतस्य मखानां समाहारः शतमखी ॥२१॥

सम्पदस्तव गिरामपि दूरा यन्न नाम [111.a] विनयं विनयन्ते ।
श्रद्दधाति क इहेह न साक्षाद्‌ चेदनुभवः परमाप्तः ॥२२॥

हे मघवन्! भवतो विभूतयो वचसामप्यविषये वर्तमाना नाम स्तोकमपि विनयं भक्तिपेशलत्वं न विनयन्ते, न त्या[5]जयन्ति। इहास्मिन्नर्थे कः श्रद्दधाति, कः सम्प्रत्येति, यदनुभव उपलम्भः साक्षात्स्वयमेव नाह, न कथयति। स च परमश्चासावाप्तश्च परमाप्तः। 'अनुभवादन्यो हिततरो नास्ति'। 'इन्द्रोऽतीव तरां विनीतः' इति ब्रह्मणोऽपि वचसि नाहं प्रत्ययं कुर्याम। यद्ययमर्थः स्वयं मया नानुभूतो भवेत्, सम्पल्लेशो-ऽपि हि विनयं त्याजयत्येव ॥२२॥

श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव कापि ॥२३॥

हे शतमन्यो! इयं तवाधिका भूयसी दृष्टीनां दृशां सृष्टिर्विनिर्मितिः। काऽप्य-पूर्वा चित्रकरी। यतः किं कुर्वतः? बहिरिव बाह्यवदन्तर्मध्येऽपि पश्यतः। चर्म-चक्षुषां हि द्वित्वे बहुत्वेऽपि बहिरेव घटपटादिपदार्थसार्थदर्शनमुपयोगो, नत्वा-न्तरहेयोपादेयाद्यमूर्तपदार्थदर्शने। तत्र हि ज्ञानचक्षुष एवाधिकारः। कथमन्तः पश्यतः इति। इतिं कथमित्याह। श्रीभरान् सम्पत्सञ्चयानतिथिसात्करवाणि गृहागताय तान् सृजानि। स्वोपभोगपरता निजसेवनैकनिष्ठता न हिता, नोपकारवती। एतदौदार्यं तवैव दृश्यत इति भावः। प्राप्तकाले पञ्चमी ॥२३॥

आः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः ।
द्यां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडौजः ॥२४॥

1. B. अनादरं. 2. B1. om. चित्र. hapl. 3. B1. वसु 4. B1. यत्नदं. 5. B1. -यन्ति.

आ: इति हर्षातिशये। हे बिडौज इन्द्र! वयं अतिशयेनोत्सुकाः स्मो वर्तामहे। कैः? भवदीयैः सहजस्निग्धैर्महिमभिः। त्वमनन्तसमयं द्यां पालय। साधु साधु भव्यं [1]विजयस्य विजयं प्राप्नुहीति नितान्तप्रीणितस्य द्विजस्य भातिरियम्। आस्तु स्यात् कोपपीड्योः। अतोऽत्र तु हर्षातिशये ॥२४॥

सङ्ख्यविक्षततनुस्रवदसृक्क्षालिताखिलनिजाघलघूनाम्।

यस्त्विहानुपगमः शृणु राज्ञां तं जगद्युवमुदन्तमुदन्तम् ॥२५॥

तु पुनस्तं तादृशं जगतो यूनां मुदः प्रीतिरन्तमवधि मुदन्तं वृत्तान्तं शृणु। तं कमित्याह। य इह भवत्समीपेऽनुपगमो नोपस्थानम्। केषाम्? राज्ञाम्। कीदृशानाम्? सङ्ख्ये सङ्ग्रामे विशेषेण क्षता [2]शस्त्रैः महता या तनुर्मूर्तिस्ततः स्रवत् क्षरयदसृं रुधिरं, तेन क्षालितं धौतमखिलं समग्रं [3]यन्निजमात्मीयमघं पापं, तेन लघवोऽगुरवस्तेषां यत् कारणात् सङ्ग्रामेषु देहमपहाय नेहायान्ति राजानस्तत्कथयामीत्यर्थः ॥२५॥

सा भुवः किमपि रत्नम[4]नर्घ्यं भूषणं जयति तत्र कुमारी।

भीमभूपत-[111·67]-नया दमयन्ती नाम या मदनशस्त्रममोघम् ॥२६॥

तत्र मर्त्यलोके सा कुमारी भुवो भूषणं किमप्यनिर्वचनीयगुणं रत्नं जयति विद्योतते। कीदृशा? भीमनाम्नो भूपस्य तनया पुत्री या दमयन्ती नाम मदनस्यामोघं शस्त्रम्। दमयन्ती नाम भीमभूपतनया सा कुमारी, या मदनस्यामोघं शस्त्रमिति वान्वयः ॥२६॥

सम्प्रति प्रतिमुहूर्तमपूर्वा कापि यौवनजवेन भवन्ती।

आशिखं सुकृतसारभृते सा क्वापि यूनि भजते किल भावम् ॥२७॥

किलेत्याप्तोक्तौ सम्भावने वा। सा कुमारी सम्प्रति कस्मिन्नपि सुन्दरे तरुणे भावं भजते, मनोवृत्तिं स्थिरीकरोति। कीदृशे? नखशिखाग्रं यावत्सुकृतस्य पुण्यस्य सारेण [5]भृते पूर्णे न ह्यल्पसुकृते यूनि साऽनुरज्यते। किं कुर्वता? यौवनजवेन तारुण्यरयेण प्रतिमुहूर्तं क्षणे क्षणे काऽप्यपूर्वा सम्पद्यमानेति प्रायेण लोकोक्तिरियम् ॥२७॥

कथ्यते न कतमः स इति त्वं मां विवक्षुरसि किं चलदोष्ठः।

अर्धवर्त्मनि रुणत्सि न पृच्छां निर्गमेण न परिश्रमयैनाम् ॥२८॥

हे शक्र! त्वं किं मामिति वक्तुमिच्छसि इति कथं तदाह – कथ्यते न स कतमः प्रकृष्टो युवा। नकारोऽत्र न निषेधे, किन्तु विधेरेवालङ्कारार्थः। कथं ज्ञातं त्वया यदहं

---

1. B1. om. विजयस्य. 2. B1. शास्त्रैः 3. B. om. निजमात्मीयम्. 4. B1. om. -न- 5. B1. सृते.

विवक्षुरस्मीति तत्राह। यतः कीदृशस्त्वं चलन्तावोष्ठौ यस्य स तथा। अर्धपथ एव पृच्छां रुणत्सि न, अपि तु पित्सुमानामेव पृच्छां निषेधय। अत्रापि नकारो विधौ। एनां पृच्छां निर्गमेण कृत्वा न परिश्रमय, मा खेदय, निष्फलत्वात् ॥२८॥

यत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति यस्मात्।
बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम् ॥२९॥

यस्मात् कारणादेतं युवानं सा योगिनोऽपि धीर्न पश्यति। सा केत्याह। यस्या योगिधियः पन्था यत्पथस्तस्यावधिराधारो यत्पथावधिः परमाणुः। परमाणुं यावद्योगिधीर्याति, न ततः परम्। एनं कीदृशम्? बालयाऽतिमुग्धया निजमन एव परमाणुस्तस्मिन् ह्रीर्लज्जा, सैव दरी तत्र शेते ह्रीदरीशयः। स चासावहरिः। हरिः कृतो हरीकृतः, तं तथा। एतेनात्यन्तमगोचरता कथिता। कन्दरान्तःशयानो हि पञ्चाननो दूरत एव परिहियते ॥२९॥

सा शरस्य कुसुमस्य शरव्यं सूचिता विरहवाचिभिरङ्गैः।
तातचित्तमपि धातुरधत्त स्वस्वयंवरमहाय सहायम् ॥३०॥

सा दमयन्ती वियोगबोधकैरवयवैः पुष्पस्य बाणस्य वेध्या कथिता सती, पितुरपि मनो निजस्वयंवरमहोत्सवाय धातुर्ब्रह्मणः सहायं द्वितीयं [112·a] व्यधत्त व्यरचयत्। विरहाभिभूतां तां चिह्नैस्तर्कयित्वा भीमोऽपि स्वयंवर-महोत्सवं तस्या विधित्सुरस्तीत्यर्थः ॥३०॥

मन्मथाय यदथादित राज्ञां हूतिदूत्यविधये विधिराज्ञाम्।
तेन तत्परवशाः पृथिवीशाः सङ्गरं गरमिवाकलयन्ति ॥३१॥

अनन्तरं यद्धेतोर्विधाता नृपाणामाह्वानदूतकर्मकरणाय मन्मथायाज्ञामादेशमादित दत्ते स्म। तेन हेतुना पृथिवीशा राजानस्तेन मन्मथेन कृत्वा परवशाः पराधीनाः सन्तः सङ्गरं रणं गरमिव विषसदृशमाकलयन्ति मन्यन्ते। पृथिवीशा इत्यस्य स्थाने त इति तच्छब्दोपादानं समञ्जसमिव प्रतिभासते। स्वरूपार्थकथनमात्रं त्वत्र नामान्तरे कृतम् ॥३१॥

येषु येषु सरसा दमयन्ती भूषणेषु यदि वापि गुणेषु।
तत्र तत्र कलयापि विशेषो यः स हि क्षितिभृतां पुरुषार्थः ॥३२॥

ननु सङ्ग्रामं विना कथं राज्ञां पुरुषार्थत्रयसिद्धिरित्याह । येषु येषु भूषणेषु कटककुण्डलादिषु यदि वापि गुणेषु शौर्यादिषु दमयन्ती साभिलाषा, तेषु तेषु कलया लेशमात्रेणापि यो विशेष उत्कर्षः स एव यस्मात् राज्ञां पुरुषार्थो धर्मार्थकामलक्षणः। यस्मै यस्मै भूषणाय गुणाय वा दमयन्ती स्पृहयालुस्तत् तत् प्राप्तये ते सर्वमन्यदनादृत्य प्रयतन्त इत्यर्थः ॥३२॥

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आददारदरदः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥३३॥

तस्या दमयन्त्याः शैशवव्ययदिनावधि यौवनप्रवेशवासरं मर्यादीकृत्य तारुण्योन्मुखे राजसमाजे नृपसमूहे कामस्य दिनं दिनं यत्नादाखेटाग्रहः पुस्फोर । युवनृपवरान् मृगानिव कुसुमशरैर्विध्यन् स्मरो विचरतीत्यर्थः। अथ च राजानश्चन्द्रास्तेषां समाजो यथा यथा यौवनोदयी भवति, तथा तथा तत्र मृग- -सद्भावान्मृगयाभिनिवेशो युक्त एव । यौवनोन्मुखराजसमाजाकृष्टोऽत्र मृगो युक्तः॥३३॥

इत्यमी वसुमतीकमितारः सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलाषे दूरमन्तरमहो नृपतीनाम् ॥३४॥

इति हेतोरमी वसुमतीकमितारो राजानस्त्वदतिथीभवितुं नैव सप्रयत्नाः। अहो चित्रं! भीमभूर्दमयन्ती सुरभूर्द्यौस्तयोः कामे राज्ञां महीयान् विशेषः। दमयन्तीप्राप्तिश्चिन्ता- -रत्नं स्वर्गप्राप्तिस्तृणं राज्ञां मनसीत्यर्थः। कमितार इति तृन्, अतस्तद्योगे वसुमती- -मिति द्वितीया । वसुमतीकमितार इति समासो वा ॥३४॥

तेन जाग्रदधृतिर्दिवमागां सङ्ग्यसौख्यम-[।।२-८]-नुसर्तुमनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥३५॥

तेन हेतुना जाग्रदधृतिरुल्लसदसन्तोषः सन्नहं त्वामनु भवत्समीपे सङ्ग्यसौख्यं सङ्ग्रामजं शर्मानुसर्तुं प्राप्तुं दिवमागां स्वर्गमागतोऽस्मि । येन हेतुना भुवि लोके धरायां भुवने क्षितिभृतां राज्ञां मृधं सङ्ग्रामं न विलोके, न पश्यामि । यतस्तस्यां दमयन्त्यां निमग्नं मनो येषां ते तथा तेषाम् ॥३५॥

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्तकरुणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥३६॥

यद्यपि वेदाहं जानामि, तदपि त्वं पृच्छसेऽर्थात् सङ्ग्रामविषयं किं वेत्सी-
-त्याह। हन्त हर्षे। भवन्तं त्वां न कोऽपि विरुणद्धि समाहूयते। यतः कीदृशम्?
हृत्पुष्वकरुणं निर्दयम्। ननु यद्येवं जानास्येव, तत्किमिति पृच्छसीत्याह। येन
कारणेन विषये रूपादौ रसस्यानुरागलक्षणस्य यः सेकः सेचनं, स विवेकस्य
विचारस्य प्रोञ्छनायोत्पुञ्छनाय भवति। सङ्ग्रामदर्शनव्यसनितया मम विवेको
विनष्ट इत्यर्थः ॥३६॥

एवमुक्तवति देवऋषीन्द्रे प्रागभेदि मघवाननमुद्रा।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥३७॥

नारदे इत्युक्त्वोपरते सति, मघोन इन्द्रस्य यदाननं तस्य मुद्रा बन्धलक्षणा-
-ऽभेदि भिन्नेति कर्मकर्तरि। इन्द्रेणोक्तमित्यर्थः। युक्तोऽयमर्थः। विभूनां प्रभ-
-विष्णूनां कोऽप्यपूर्वो मञ्जुलतमोऽतिमनोहरः। क्रमेण परिपाट्या वादो भाषणम्॥३७॥

कानुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिमि वीतविशङ्कः ॥३८॥

निजे स्वकीयेऽनुजे लघुभ्रातरि दनुजारौ विष्णौ जाग्रति सति सततोद्यते सति,
रणचर्चा सङ्ग्रामविचाररूपा मम का, अपि तु न काऽपि। यस्य भुजाङ्कं बाहुमध्यं
जयाङ्कं जयचिह्नमुपधायोपबर्हं कृत्वाऽहं वीतविशङ्को निर्भयः स्वपिमि शये।
जयस्याङ्कश्चिह्नं लाञ्छनं यत्र स तथा। बाहौ बाहुमध्ये वा वर्तमानं लाञ्छनं
बाहुबलं सूचयति। तेन च विजयमारोप्यत एव। (विजयः प्राप्यत एव) केचित्
तु जयाङ्कं सुदर्शनाख्यं चक्रमाहुः। दनुजारिशब्दोऽत्र साभिप्रायः। अन्यस्मिन्नपि
हिते बन्धौ गृहादिरक्षार्थं निशि जाग्रति सति तद्बन्धुभिरपरैर्निजं वामं बाहु-
-मुपधानीकृत्य सुखेन निर्भयं सुप्यते ॥३८॥

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥३९॥

तस्य विष्णोर्जैमिनिमुनित्वमुदीये उदितम्। कस्मात्? विश्व-[113-ब]-रूपकल-
-नात् येनैव हि विश्वरूपे कलनं कृतं स एव जैमिनिर्नाम मुनिः। विश्वानि
समग्राणि यानि रूपाणि पदार्थमूर्तयस्तेषां कलनं परिच्छेदः। तत्त्वतस्तु
विश्वमेव रूपं, देहस्तस्य कलनं धारणं, भगवान् किल विश्वमूर्तिः।

किञ्च यो विष्णुर्ममाशानिं बहु व्यर्थतां निनाय नैरर्थक्यं प्रापयत् । किं करिष्णुः ? मखभुजां देवानां विग्रहमसहिष्णुरक्षन्ता, अतोऽपि जैमिनिमुनित्वम् । जैमिनिना हि मखभुग्विशेषणविशिष्टानां देवानां विग्रहं शरीरमसहमानेन ममाशनिर्निष्फलीकृतः । शरीराभावे वज्रस्याप्यभावप्रसङ्गात् । तत्त्वतस्तु विग्रहो वैरम् । अशनेर्व्यर्थता तत् कार्यस्य, तेनैव कृतत्वात् । जैमिनिनामा मुनिर्मन्मनयी रेवतामाह, तथा च सति यज्ञांशभोक्तृत्वं न घटते ॥३९॥

ईदृशानि मुनये विनयाब्धिस्तस्थिवान् स वचनान्युपह्लत्य ।
प्रांशुनिःश्वसितपृष्ठचरी वाग्नारदस्य निरियाय निरोजाः ॥४०॥

पूर्वोक्तानि वचांसि मुनये नारदाय ढौकयित्वा स विनयमभिधाय स विनयसागर इन्द्रस्तस्थिवान् स्थितः । भाषणाद् विरराम । अथ नारदस्य मुखान्मन्दतरा गीर्निरगात् । कीदृशी ? प्रांशूच्चं यन्निश्वसितं निःश्वसनं, तस्य पृष्ठे पश्चाद्भागे चरतीति प्रांशुनिश्वसितपृष्ठचरी, दीर्घं निःश्वस्य मन्दतरं जगादेत्यर्थः । निर्गतमोजो यतः सा निरोजाः । उक्तोऽत्र स्वरादिगता प्रौढिः ॥४०॥

स्वारसातलभवाहवशङ्की निर्वृणोमि न वसन्वसुमत्याम् ।
धीं गतस्य हृदि मे दुरुदर्कः क्ष्मातलद्वयभयाधिवितर्कः ॥४१॥

तामेव वाचमाह । स्वः स्वर्गो रसातलं पातालं, तत्र भवं जायमानमाहवं कलिं शङ्के सम्भावयामीत्येवंशील सन्नहं वसुधायां भुवि वसन् वर्तमानो न निर्वृणोमि, न सुखं प्राप्नोमि । धीं गतस्य भवन्तमुपस्थितस्य मे हृदि मम मनसि क्ष्मायास्तलयोर्द्वयं तस्य भया योधास्तेषामाधिर्युद्धं, तस्या वितर्क ऊहो दुरुदर्को दुष्टोत्तरफलः । क्ष्मातलं भूपृष्ठं मर्त्यलोकः पातालं च । उदर्कः फलमुत्तरं, स दुष्टो यत्र वितर्के सुनिश्चितत्वात् ॥४१॥

वीक्षितस्त्वमसि मामथ गन्तुं तन्मनुष्यजगतेऽनुमनुष्व ।
किं भुवः परिवृढा[1] न विवोढुं तत्र तामुपनता विवदन्ते ॥४२॥

हे शक्र ! त्वं दृष्टोऽसि । एतद्देवागमनफलं जातम् । अथेति मङ्गले । साधु सम्पन्नम् । तस्मान्मनुष्यजगते मर्त्यलोकाय गन्तुं मामनु मनुष्वानुजानीहि । तत्र भूलोके भुवः परिवृढा राजानस्तां[2] भैमीं विवोढुं[3] परिणेतुमुपनताः सन्तः किं विवदन्ते,

1. B1. – दृढा. 2. B1. राजान – 3. J. om. विवोढुं परिणेतु-

न सम्भावयामि तस्याः स्वयंवरस्थानं गताः कलहायमा-[113·6]-ना भविष्यन्ति ॥७२॥

इत्युदीर्य स ययौ मुनिरुर्वीं स्वर्पतिं प्रतिनिवर्त्य बलेन ।
वारितेऽप्यनुगमाय सयत्नं तं कियन्त्यपि पदान्यपराणि ॥७३॥

एवमभिधाय स नारदो भूलोकं गतः। किं कृत्वा? बलेन[1] हठेन शक्रं गृहं प्रतिनिवर्त्य [2]प्रतिगमय्य। कीदृशम्? वारिते निषेधेऽपि सति, कियन्त्यपि पदानि त्रिचतुरान् क्रमान् तमनुगमाय, तस्य पश्चाद् व्रजनाय सयत्नमादरपरमिति। जातिरलङ्कृतिः॥ ॥७३॥

पर्वतेन परिपीय गभीरं नारदीयमुदितं प्रतिनेदे ।
स्वस्य कश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शि न पक्षः ॥७४॥

पर्वतेन मुनिना नारदस्येदं नारदीयं गभीरं महार्थं वचनं परिपीय, सम्यक् श्रुत्वा, प्रतिनेदे प्रतिशब्दितम्। यन्नारदेनोक्तं तदेव प्रतिपन्नमित्यर्थः। अथवा तत् सदृशमेवोक्तम्। प्रतिनादो हि नादेन सदृशो भवति। ननु स्वमतं किमपि कस्मात् तेन नोपन्यस्तमित्याह। पर्वतपक्षच्छेदिनि शक्रे स्वस्यात्मनः स्वयमात्मना कश्चिदपि पक्षो [3]वक्तव्यविभागो नादर्शि, न प्रकटितः। नारदस्य मान्यत्वादिति भावः। अथ चार्थान्तरम्। पर्वतेनाद्रिणा गभीरं मन्द्रं नारदसंबंधिवचनं परिपीय गुहामुखैः संगृह्य प्रतिनेदे प्रतिध्वनितम्। पर्वतानां पक्षान् [4]पतत्राणि छिनत्तीति पर्वतपक्ष[5]च्छेदी। तस्मिन् विषये स्वस्य स्वयमात्मनैव कश्चिदपि पक्ष उड्डयनहेतुभूतो न दर्शितः। स हि दृष्टमात्रं पर्वतस्य पक्षं छिनत्ति ॥७४॥

पाणये बलरिपोरथ भैमीशीतकोमलकरग्रहमर्हम् ।
भेषजं [*]चिरधृताशनिवासव्यापदामुपदिदेश रतीशः ॥७५॥

अनन्तरं कामः शक्रस्य हस्ताय भैम्याः शीतस्य कोमलस्य च करस्य पाणिग्रहणमेवार्हं योग्यं भेषजमौषधमुपदिष्टवान्। कासां? चिरं बहुकालं धृतोऽशनेः [6]वज्रस्य यो वासः स्थितिस्तस्य विशिष्टा आपद उपद्रवास्तासाम्। वज्रस्यौष्ण्यं काठिन्यं च [7]प्रसिद्धिः। तयोः संबन्धादिन्द्रपाणेरपि ते सम्भवत एव। तयोः प्रतियोगिता च शैत्यमृदुत्वयोर्युक्ता। कामवशादिन्द्रस्य दमयन्तीविवाहस्पृहा जातेत्यर्थः। अत्र गम्योत्प्रेक्षानुमानं वा ॥७५॥

---

1. D. om. बलेन. 2. B1. om. प्रति- 3. B1. वक्त्र- 4. B1. om. पतत्राणि. 5. D. -छित- 6. B1. om. वज्रस्य, 7. B1. प्रसिद्धैः. * B1, D. विरचिता.

नाकलोकभिषजो: सुषमा या पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसङ्क्रमितवैद्यकविधि: ॥७६॥

ननु कुत: कामस्य भिषक्क्रियोपदेशसामर्थ्यमित्याह[1] । नाकलोकस्य भिषजौ वैद्यावश्विनीकुमारौ, तयोर्या सुषमा परमा शोभा, सैव पुष्पचापं काममपि चुम्बति, संसेवते भजतीति यावत् । वेद्मि जानामि । [114.a] तद्द्वारसंक्रमित-वैद्यकविधि: सन्नसौ पुष्पचापस्तादृक् पूर्वोक्तमभिषज्यदभिषज्यति स्म । सैव सुषमा द्वारं प्रवेशमार्ग उपायस्तेन सङ्क्रमिता सञ्चारिता । वैद्यकविधा चिकित्सा-गमशास्त्रं यत्र । अन्यापि कापि नायिका कञ्चन भिषजमधिवसति, साऽवश्यं कियतीमपि[2] तद् विद्यां वेत्ति । यं च प्रसङ्गाद् भजते प्रेम्णा सोऽपि तां शिक्षयत्येव । तत्त्वतस्तु रूपकृतमेव तयोस्तस्य च सादृश्यम् । अथवा सादृश्यसञ्जातसख्यवशाद्-तयोर्विधा तस्मिन् सङ्क्रान्ता । सखा हि निजविद्यां सख्ये समुपदिशति । भिषज्यधातु: कण्ड्वादौ ॥७६॥

मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य[3] मघोनी ।
खण्डितं निजमसूचयदुच्चैर्मानमाननसरोरुहनत्या ॥७७॥

अथ मघोनी शची खर्वभावं लघुत्वमवलम्ब्य प्राप्य निजमात्मीयमुच्चैरधिकं मानं गौरवं खण्डितं भग्नमसूचयत् कथयामास । कया ? आननमेव सरोरुहं तस्या नतिर्नमनम्, वाक्त्वं, तया कृत्वा । मानभङ्गाद्ध्यवश्यं महानधोमुखस्तिष्ठति । क्व सति ? पत्यौ प्रिये शक्रे मानुषीं दमयन्तीमनुसरति समाश्रयति सति । मान-भङ्गादिन्द्राणी तदाऽधोमुखीभूय स्थिता, न किञ्चिदुक्तवतीति भाव: । अन्यापि लताशिखागनमनेन कृत्वा निजमुच्चैरुन्नतं मानं प्रमाणं खण्डितं कृत्तं सूचयति ॥७७॥

यो मघोनि दिवमुच्चरमाणे रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्या: शान्तमान्तरमभाषत भङ्ग्या ॥७८॥

मघोनि शक्रे दिवं स्वर्गमुच्चरमाणे मुञ्चति सति, रम्भया दिव्यस्त्रिया अलम-त्यर्थं यो मलिनिमा कृष्णत्वलक्षणो गुणोऽलम्भि प्राप्त: । खलु नूनं स मलिनिमलक्षणो वर्ण एवास्या रम्भाया आन्तरं चित्तस्थमुज्ज्वलं विशदं गुणं शान्तं निवृत्तमभाषत । कया ? भङ्ग्या युक्त्या । बाह्यमालिन्यदर्शनादान्तरं

1. B1. भिषत. 2. B1. कियतम. 3. B1, B. उपगत्य.

मालिन्यमनुमीयत एव। भाषणस्य च मुख्या गौणी लक्षणा व्यङ्ग्या[1] ध्वनिरित्यादि-[2]
-भेदेन बह्व्यो[3] भङ्ग्यो भवन्ति। अथ चार्थान्तरम्। अस्या आन्तरं चित्तस्थमुज्ज्वलं
शृङ्गाराख्यं रसं शान्ताख्यमभाषत। मालिन्यं दृष्ट्वा ज्ञायते यदियं रम्भा विषय-
-सुखमपहाय योगमास्थाय मुक्तिं गन्तुमिच्छति शिरोमुण्डनपुरःसरं तपश्चिकीर्षति
वा। उच्चरमाण इति उदः सकर्मकश्चेत्यात्मनेपदम् ॥४८॥

जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः।
इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमितेन ॥४९॥

दीर्घं च तन्निःश्वसितं च तस्य निर्गमितं निःसरणं, तेन कृत्वा घृताच्या
दिव्यस्त्रिया। इत्येवमवाच्यभिहितं कथं यथा स्यात्। [114.6] अनक्षरमक्षरै-
-र्वर्णैर्विनैव। प्रायेण वचनमक्षरैरेव भवति। इति कथमित्याह। अप्सरसां जीवितेन
प्राणितेन कृतं पूर्णं[4] तस्मान्नोऽस्माकमिहास्मिन्नवसरे प्राणानामसूनां मुक्तिरुत्[5]-
-सृष्टिरुत्क्रान्तिर्युक्तिमती भृशमुचिता। निःश्वसितं हि प्राणाख्यवायुमयम्। तच्च
तदा तस्या दीर्घं निःश्वसितमपमानात्। तद्दर्शनात् अभ्यूह्यते, प्राणाः शीघ्रं यान्ति[6]
तस्या अभिप्राय इति ॥४९॥

साधु नः पतनमेवमितः स्यादित्यभण्यत तिलोत्तमयापि।
चामरस्य पतनेन कराब्जात्तद्विलोकनचलद्भुजनालात् ॥५०॥

एवमनया रीत्या नोऽस्माकमितः स्वर्गात् पतनमधोगमनं साधु युक्तं स्यादिति
तिलोत्तमयाऽप्सरोभिरभण्यताभिहितम्। केन कृत्वा? कराब्जात् पाणिकमलात्
सकाशाद् यच्चामरस्य पतनं, तेन। कीदृशात्? तस्येन्द्रस्य भुवं प्रति प्रस्थितस्य
यद् विलोकनं, तेन चलन्, कम्पमानो भुज एव नालो यस्य तस्मात्। नाले
कमलस्य चलिते सति तदधिष्ठितस्य चामरस्य पतनं युक्तमेव। तिलोत्तमा
बलारेश्चामरधारिणी। अनुकृतेरनुभयो[7]ऽत्र प्रदर्शनीयो, यथेदं चामरं मम करात्
पतितमेवं चेद्वयं दिवः पतामस्तदा भव्यं भवेदिति तया तेन कृत्वा सूचितमित्यर्थः
॥५०॥

मेनका मनसि तापमुदीतं यत्पिधित्सुरकरोद्वचहित्थाम्।
तत् स्फुटं निजहृदः पुटपाके पङ्क्तिलिप्तिमसृजद्बहिरुत्थाम् ॥५१॥

1. B. व्यंगा. 2. B1. ध्वनेत्यादि- 3. B1. बहुयो. 4. B1. पूर्या. 5. B1. -सृत-
6. B1. याति. 7. B. -भुवो.

मेनकाख्या नाकनारी मनस्युदीतमुत्पन्नं तापं दुःखलक्षणं पिधित्सुः पिधातुमिच्छुः सती यद्वहित्थामाकारगुप्तिमकरोत् स्फुटं नूनं निजहृदः स्वहृदयस्य पुटपाके पुटपाकनिमित्तं बहिरुत्थां बहिर्भवां पङ्कस्य लिप्तिं कर्दमस्य लेपनमसृजद् व्यरचयद्। पुटे पाकः पुटपाकः। पुटे पलाशपत्रादिमध्ये यः शाकादीनां पाकः क्रियते, तत्र पुटे पूर्वं कर्दमस्य लेपनं भवति। तापेन च पाको भवत्येव परमाभ्यन्तरः। तथा तु वैदग्ध्यान्मनोगतः परितापः सङ्गोपितः ॥५१॥

उर्वशी गुणवशीकृतविश्वा तत्क्षणस्तिमितभावनिभेन।
शक्रसौहृदसमापनसीमस्तम्भकार्यम[1]पुषद्वपुषैव ॥५२॥

उर्वशी नाम स्वर्वेश्या शक्रस्य शक्रेण वा यत्सौहृदं प्रेम, तस्य समापनं परिपूर्तिस्तस्य सीमाऽवधिस्तस्य यः स्तम्भः स्थूणाभेदस्तस्य कार्यमर्थं वपुषा शरीरेणैवापुषद् दृढीचकार। केन कृत्वा? तत्क्षणं तस्मिन्नवसरे, यः स्तिमितभावो निश्चलत्वं, तन्निभेन तद्व्याजेन। कीदृशी सा? गुणैः कृत्वाऽवशं सद्गुणं कृतं विश्वं [115.a] यया सा तथा। इन्द्रं प्रस्थितमवलोक्य तस्मात्(त्) क्रोधाभिमानवशात् तस्या जडीभावोऽभूदिति भावोऽत्र। अन्यत्रापि सीमनि स्तम्भो निखन्यते ॥५२॥

कापि कामपि बभाण[2] बुभुत्सुं शृण्वति त्रिदशभर्तरि किञ्चित्।
एष कश्यपसुतामभिगन्ता पश्य कश्यपसुतः शतयज्ञः ॥५३॥

कापि दिव्यस्त्री कामपि दिव्यस्त्रियं बुभुत्सुं शक्रप्रस्थानप्रयोजनं ज्ञातुमिच्छुं बभाण। परं त्रिदशभर्तरि शक्रे किमपि मनाक् शृण्वति सति। किमुवाचेत्याह। पश्यावलोकय। एष कश्यपस्य[3] मुनेः सुतः शतयज्ञः इन्द्रः कश्यपसुतां भुवमभिलक्ष्यीकृत्य[4] गन्ता गमिष्यति। वाक्यार्थस्यैव कर्मता। अत्र पक्षे कश्यपसुतः शतयज्ञ इति द्वयं स्वरूपार्थकथनमात्र एव। अथ च आली पश्य प्रत्यक्षीकुरु। एष कश्यपस्याद्यस्य मुनेस्तावत्सुतो विशेषाच्च शतस्य यज्ञानां कर्ता कश्यपसुतां निजभगिनीमभिगन्ता गमिष्यतीति। गमिरत्र मैथुनार्थः। अत्र पक्षे तु सर्वाणि पदानि साभिप्रायाणि। एवंविधोक्तिव्यवहारे त्वत्र प्रेमैव हेतुः ॥५३॥

आत्ति[5]मात्मसुभगत्वसगर्वा कापि शृण्वति मघोनि बभाषे।
वीक्षणेऽपि सघृणासि नृणां किं यासि न त्वमपि सार्थगुणेन ॥५४॥

---

1. B1. असृजद्. 2. B1. बभाव- 3. B1. कश्यपमुनेः 4. B1. -लक्ष्मी-, B. -लक्षी-
5. B1. आत्म-

एते पदार्थास्तस्य भूपतेर्नलस्य व्यवसितानि चिकीर्षितानि शशंसुः सूचयन्। केषु विषये ? तेषु देवेषु। एते के इति तान् प्रत्येकं दर्शयति। तद्विधा तादृशी सर्वोत्कृष्टा। या वधूर्दमयन्ती, तस्या वरार्थं, सस्पृहं स्वीकारो, विवाहविधिस्तस्यार्हं भूषणं मुकुटादि। स स्वयंवरश्चासरं निकटवर्ती समयः कालः। स च कुण्डिनाख्यं पुरं प्रतिसर्पन् गच्छन् रथस्याध्वा मार्गः एतैर्लिङ्गैरयं नलो नाम नृपतिर्दमयन्तीवरणाय कुण्डिनं नगरं व्रजतीति तैरुल्लिङ्गितमित्यर्थः ॥६७॥

धर्मराज-[117.8]-सलिलेशहुताशैः प्राणतां श्रितममुं जगतस्तैः।

प्राप्य हृष्टचलविस्तृततापैश्चेतसा निभृतमेतदचिन्ति ॥६८॥

तैर्यम, वरुण, वह्निभिरमुं नलं जगतो विश्वस्य प्राणतां श्रितं प्राप्य हृष्टचलविस्तृततापैः सद्भिश्चेतसा मनसा निभृतं स्थिरं गूढं चैतद् वक्ष्यमाणम चिन्ति चिन्तितम्। अयं नलो जगतः प्राणभूतः प्राणशब्देन जीवः प्राणाख्यो वायुश्चोच्यते। अतस्तं जीवरूपं प्राप्य यमो हृष्टो[1]ऽभूत्। प्राणवायुरूपं प्राप्य वरुणवह्नी चलविस्तृततापावभूताम्। वरुणो हि जलम्। तच्च वायुं प्राप्य चलति। वह्नेश्च वायुः सखा, ततो वह्निस्तं प्राप्य विस्तृततापो भवत्येव। यथासङ्ख्योऽलङ्कारः ॥६८॥

नैव नः प्रियतमोभयथासौ यद्यमुं न वृणुते, वृणुते वा।

एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः ॥६९॥

तदेव विचिन्तनमाह। यद्यमुं नलं न वृणुते, वाऽथवा वृणुते। हि यस्मादेकत एकस्मिन् पक्षे नलावरणलक्षणेऽमूं दमयन्तीमगुणज्ञां धिग् निन्द्यामः। यदि सा नलमेवमसामान्यगुणं न वृणुते, तदा सा खल्वगुणज्ञा। तया चेदृश्यास्माकमपि न कार्यम्। अन्यतोऽस्मिन् द्वितीये पक्षे नलवरणलक्षणे कथं केन प्रकारेणादःप्रतिलम्भ एतत प्रतिप्राप्तिः। परकलत्रीभूतत्वात् सर्वथा तस्या अप्राप्तिरेव। अमुष्याः प्रतिलम्भोऽदःप्रतिलम्भः। नः प्रियतमेति वक्तुं न युक्तमिति केचिदाहुः। तन्न। नोऽस्माकमित्यत्रास्मदर्थस्य प्रत्येकवृत्तित्वात्। गौरवं वा स्वस्मिन् प्रत्येकमारोपितं तैः ॥६९॥

नो वरिष्यति तदा यदि मत्तो वेद नैषधमियत्स्य महत्त्वम्।

ईदृशी च कथमाकलयित्री मद्विशेषमपरान्नृपपुत्री ॥७०॥

---

1. B1. हृष्टवान्.

इयं दमयन्ती मां तदा वरिष्यति, यदि मत्तः सकाशादियदेतन्महत्त्वं सर्वगुणगौरव-मस्य न वेद, न जानीते। ईदृशी च मुग्धा नृपपुत्री राजकन्या अपराज्मदन्यतः पुरुषात् सकाशान्मद्विशेषं मम महत्त्वं कथं केन प्रकारेणाकलयित्री ज्ञात्री। काक्वा अपि तु नैव ज्ञास्यति। नृपपुत्रीति साभिप्रायम्। सा हि प्रायेण लालनगुहिला भवति। वेदेति भविष्यत् समीपवर्ती वर्तमानः। तदनन्तरभवं तु वरणं भविष्यदेव ॥७०॥

नैषधे बत वृते दमयन्त्या व्रीडितो न हि बहिर्भवितास्मि।
स्वां गृहेऽपि वनितां कथमास्यं ह्रीनिमीलि खलु दर्शयितास्मि ॥७१॥

बत खेदे। भैम्या नले स्वीकृते सति लज्जितः सन्नहं न गृहाद् बहिर्भविताऽस्मि, भविष्यामि। बहिर्भवननिर्देशात् गृहान्तर्भवनं प्राप्यते। न ह्यप्रविष्टस्य निर्गमनं सम्भवति। किञ्च। गृह-[117.b]-मध्येऽपि वर्तमानः सन् निजां जायां केन प्रकारेण मुखं दर्शयिष्यामि। कीदृशमास्यम्? ह्रिया निमीलति[1] निमज्जतीत्येवंशीलं ह्रीनिमीलि लज्जासङ्कोचि निमीलनमत्र तात्स्थ्यान्नयनगतमेव[2] लोकोक्तेर्जातिरियं हास्यहेतुः ॥७१॥

इत्यवेत्य मनसात्मविधेयं किञ्चन त्रिविबुधी बुबुधे।
नाकनायकमपास्य तमेकं सा स्म पश्यति परस्परमास्यम् ॥७२॥

त्रयाणां विबुधानां समाहारस्त्रिविबुधी देवत्रयी। मनसेति पूर्वोक्तमवेत्य ज्ञात्वा तमेकं नाकनायकमपास्येन्द्रं वर्जयित्वा आत्मविधेयं निजकर्तव्यं किञ्चन किमपि न बुबुधे नाज्ञासीत्। इन्द्रं वर्जयित्वा ते त्रयोऽपि किंकर्तव्यतामूढा जाता इत्यर्थः। तर्हि सा किं चकारेत्याह। परस्परमास्यं पश्यति[3] स्म। अन्योऽन्यस्य मुखं ददर्श। किमिदानीं विधेयमित्याशयेनेति भावः। इन्द्रवर्जनं तु तस्य तत्कालोचितबुद्धेः स्फुरणात्। तमेकं नाकनायकमपास्य परस्परमास्यं पश्यति स्मेति व्याख्येयम्। स केवलं तन्मतात् पृथग्भूत इत्यर्थः ॥७२॥

किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य मखभुक्षाः।
शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलक्ष्य नलस्य ॥७३॥

मखभुक्षा इन्द्रः। स्वानुगानां वह्निप्रभृतीनामाननानि[4] मुखानि किमिदानीमस्माभिः कर्तव्यमित्यत्र विमुग्धानि मूढानि दृष्ट्वा। नलस्य छलनं मनसि कृत्वोवाच। कीदृशः? कपटे छद्मन्युच्चैः पटुरतिदक्षः। मखवर्णे सन्धिर्न विवक्षितः ॥७३॥

---

1. B. om. निमीलति. 2. B1. तात्स्थ्यान्- 3. B1. पश्यन्ति. 4. B1. आननानि.

सर्वत: कुशलवानसि कच्चित्त्वं स नैषध इति प्रतिभा न: ।

स्वासनार्धसुहृदस्त्वयि रेखां वीरसेननृपतेरिव विद्म: ॥७४॥

कच्चिदित्यभी[1]ष्टप्रश्ने । असि त्वं सर्वत्र कुशलवान् । प्रत्यक्षे नामनिर्देशं विनैव त्वमिति निर्देश एव नामविशेषं गमयति । ननु कोऽहमिति भवान्न जानात्येव । तत: कुत: सहसा कुशलप्रश्न इत्याह । नोऽस्माकमिति प्रतिभा कुशाग्रीया बुद्धिर्यत् स प्रसिद्धो नैषधो नलस्त्वमेव । ननु प्रतिभावानपि पुमान् हेतुं दृष्ट्वा हेतुमन्तमादत्ते, तदत्र मयि स नैषधस्त्वमिति प्रत्यभिज्ञाने को हेतुरित्याह । वीरसेननाम्नो नृपतेरिव रेखामवयवरचनां त्वयि विद्म: पश्याम: । ननु वीरसेनेन सार्धं भवतां कथं सङ्गतिरित्याह । कीदृशस्य ? स्वासनार्धसुहृद इति । स्वं च तदासनं च तस्यार्धं, तस्य सुहृन्मित्रमित्य- -नेन मानाधिक्यकथनेन प्रेमातिशयकथनम् । पुत्रश्च प्रायेण पित्रा सदृश एव [2]भवति । साभिप्रायत्वं चात्र ज्ञेयम् ॥७४॥

क्व प्रयास्यसि नलेत्यलमुक्त्वा [114.a] यात्रयात्र शुभयाजनि यन्न: ।

तत्तथैव फलसत्वरया त्वं नाध्वनोऽर्धमिदमागमित: किम् ॥७५॥

हे नल ! त्वं क्व प्रयास्यसीत्यु[3]क्त्वाऽलम् । [4]नैवं वक्तुं युक्तम् । यत्कारणान्नोऽस्माकं यात्रया सत्पुरुषो[5]द्दिष्ट[6]प्रस्थित्या शुभया श्रेष्ठयाऽजनि सम्पन्नमिति [7]भाव: । तत् तस्मात् तथैव यात्रया फले कामिते विषये सत्वरया समुत्सुकया त्वमिदमध्वनो मार्गस्यार्धं भागं किं नागमित: फलदा भवति । तच्चतस्तु यात्राप्रस्थानमात्रम् ॥७५॥

एष: नैषध ! स दण्डभृदेष ज्वालजालजटिल: स हुताश: ।

यादसां च पतिरेष च शेषं शासितारमधिगच्छ सुराणाम् ॥७६॥

ननु के यूयमित्याह । हे नैषध ! एष इतो वर्तमान: स प्रसिद्धो दण्डभृदित्यनेनैव विशेष्यविशेषणभावोऽत्र । एष द्वितीयो ज्वालानां जालेन [8]कुटिल: सञ्जातजट इव हुताशो देवानां मुखं वह्नि: । एष च तृतीय: स यादसां जलजन्तूनां पतिर्वरुण: । शेषं चतुर्थं सुराणां शासितारमिन्द्रमधिगच्छ जानीहि । चतुर्थोऽहमिन्द्र इत्यर्थ: । अत्र सर्वाणि नामानि प्रशंसागर्भाणि साभिप्रायाणि । किञ्चिन्नामविशेषणमत्र किञ्चिच्च निर्विशेषणमिति क्रमभङ्गप्रसङ्ग: । स्वबुद्ध्यैव विमृश्य परिहार्य: ॥७६॥

---

1. B1. -निष्ट- 2. B1. इति. 3. B1. उक्ता- 4. B1. नैवं.
5. B1. उद्दिष्ट- 6. B1. प्रतीत्या. 7. B. भावे. 8. B1. जटिल: interlinear

अर्थिनो वयममी समुपेमस्त्वां नलेति फलितार्थमवेहि।
अध्वनः क्षणमपास्य च खेदं कुर्महे भवति कार्यनिवेदम् ॥७७॥

हे नल! एते चत्वारो वयमर्थिनो याचकाः सन्तस्त्वामुपेमः उपगताः स्म इति फलितार्थम्। संक्षिप्तार्थमवेह्यवगच्छ नु पुनरध्वनः खेदं, मार्गस्य श्रमं क्षणमपास्यापनीय च भवति त्वयि विषये कार्यनिवेदनं, कर्तव्यनिवेदनं करिष्यामः। फलितार्थमिति गणितागमसङ्केतः। तत्र द्व्यङ्कानां प्रकीर्णानामेकीकरणं फलमित्युच्यते। समुपेम इत्यतीतसमीपवर्ती वर्तमानः। कुर्महे इति तु भविष्यत्समीपवर्ती ॥७७॥

ईदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे।
नात्र चित्रमभिधाकुशलत्वे शैशवावधि गुरुर्गुरुरस्य ॥७८॥

बिडौजा इन्द्रः पूर्वोक्तां वाचमुदीर्य जोषमास, तूष्णीं बभूव, विशिष्याधिकं कृत्वा किमपि न बभाषे। बीजभूतमर्थं प्रदर्श्य निवृत्तः। युक्तमेतत्। अत्र बिडौजसि वचनचातुर्ये नैव चित्रमद्भुतम्। यतः शैशवावधि बाल्यात् प्रभृति गुरुर्बृहस्पतिरस्य गुरुरुपदेष्टा। गुरोश्च गुणगौरवं प्रसिद्धमेव। एतदेव हि वक्तृत्वं यत्फल्गुभूतमपहाय सारभूतमेवोपन्यस्यते ॥७८॥

अर्थिनामहृषिताखिलरोमा स्वं नृपः स्फुरकदम्बकदम्बम्।
अर्चनार्थमिव तच्चरणानां स प्रणामकरणादुपनिन्ये ॥७९॥

स नृपो नलः स्वमात्मानं तच्चरणानां प्रणामकरणात् हेतोः [॥१.८] रुपनिन्ये ढौकयत्। तच्चरणाग्रे दण्डवन्ननामेत्यर्थः। कीदृशः? अर्थिनां नाम्नैव नामश्रवणमात्रेणैव हृषितानि कण्टकितान्यखिलानि रोमाणि तनूरुहाणि यस्य स तथा। अतश्चोत्प्रेक्षते। स्फुरतां[1] विकसितानां कदम्बानां कदम्बकुसुमानां कदम्बकं निकुरम्ब[2]मेवोपनिनाय। किमर्थम्? अर्चनार्थं, पूजनाय। एकं तावत् साक्षादिन्द्रादिदेवदर्शनं हर्षहेतुर्द्वितीयमर्थिनामश्रवणमतः समन्ततस्तस्य रोमोद्भेदः। हृषित इति हृषेर्लोमस्वितीडागमः ॥७९॥

दुर्लभं दिगधिपैः किमभीभिस्तादृशं कथमहो मदधीनम्।
ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ॥८०॥

नलेना[3]धिकेयत्वे संशय्यते स्म। किं कृत्वा? एवंरूपं सन्देहं चिन्तयित्वा। ईदृशं कीदृशम्? तदाह। एते तावच्चत्वारोऽपि दिशामधिपा, अतोऽमीभिर्दिशामधिपैः किं वस्तु दुरापं विद्यते।

1. ख. स्फुरतां. 2. ख. निकुरुम्ब–. 3. नलेनाप्य–.

तादृशं किञ्चिदेषामपि[1] दुःप्रापं, तदहो, महान् विस्मयः। मयि विषये कथमधीनमायत्तम्। एतेषामर्थित्वाद् वस्तुनः कस्यापि दुर्लभत्वं ज्ञातं विशेषे तु संशयः ॥८०॥.

जीवितावधि वनीयकमात्रैरर्थ्यमानमखिलं सुलभं यत्।
अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः ॥८१॥

देवताधिपाय याचकाय किं वस्तु दत्वा मनः सुखी भवतु। यत् कारणात् सामान्यैर्मार्गणैर्मम प्राणसीम याच्यमानं सत् सुप्रापम्। अत्र साभिप्रायता सर्वत्र महती ॥८१॥

भीमजा च हृदि मे परमास्ते जीवितादपि[2] धनादपि गुर्वी।
न स्वमेव[3] मम सार्धति[4] यस्याः षोडशीमपि कलां किल नोर्वी ॥८२॥.

च पुनः, परं केवलं, मे हृदि, मम स्वान्ते, भीमजा दमभगिन्यास्ते तिष्ठति। कीदृशी? । जीवितादपि गुर्वी समधिका धनादपि। किलेति सम्भावने। यस्याः षोडशीं कलां षोडशांशमुर्व्यपि नार्हति, न[5] मूल्यलभ्या भवति। मम स्वमेव धनमेव। मम धनेन पृथिव्या च यस्याः षोडशांशोऽपि न प्राप्यत इत्यर्थः। अन्ये त्वेवं व्याचक्षते – याऽसौ भीमजा मम स्वमेव न भवति, अपि तु सा परं स्वम्। ननु भवान् भुवो भर्ता समस्तसम्पन्निधानं सा क्रीत्वाऽपि किं नैतेभ्यो दीयत इत्याह। यस्याः किल षोडशीमपि कलामुर्वी नार्हति। मम चोर्व्येव स्वम्। गुर्वी किलोर्वीति दूरवर्तिनी बुद्धिधाराविषयिणी वर्णमैत्री अक्षरशक्तिवशाद् भविष्यन्नर्थोऽस्य मनस्यस्फुरत् ॥८२॥

नीयतां कथमभीप्सितमेषां दीयतां द्रुतमयाचितमेव।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः ॥८३॥.

एषामभिलषितं केन प्रकारेण नीयतामभ्यूह्यताम्। ननु यद्यनुमिमीषे केनापि हेतुना ततः किं करोषीत्याह। द्रुतं शीघ्रमयाचितमेव [119.a] दीयताम्। उभयत्र प्राप्तकाले पञ्चमी। अस्य द्वयस्यायमवसरः। काकुगर्भं वाक्यद्वयमेतत् परस्परापेक्षम्। ननु योऽयाचितमपि ददाति सोऽपि धन्य एवेत्याह। तं धिगस्तु तं निन्दा प्राप्नोतु। योऽर्थिनां वाञ्छां कलयन् जानन्नपि तस्य वाचामवसरं प्रस्तावं सहते प्रतीक्षते। अस्त्वित्यस्तिरत्रभवत्यर्थे भवतिस्तु प्राप्त्यर्थः ॥८३॥.

मापितेन चटुकाकुविडम्बं लम्भितेन बहुयाचनलज्जाम्।
अर्थिना यदहमर्जति दाता तन्न लुम्पति विलम्ब्य ददानः ॥८४॥.

1. B. च यदेषामपि. 2. B1, B.-जीवनादपि. 3. B1-स्वमेवमपि. 4. B1-सार्थति. 5. B. न पूरयति।

दाता पुरुषोऽर्थिना याचकेन कृत्वा यदघं किल्बिषमर्जति, सञ्चिनोति, विलम्ब्य कालक्षेपं कृत्वा ददानो वितरंस्तदपि न लुम्पति मार्जयति। अन्यच्छुभं फलं तावत् तिष्ठतु। अनिष्टान्तरमेवास्यापततीत्यर्थः। कीदृशेन? चटूनि प्रियवाक्यानि तत्र याः काकवो दीनध्वनिविकाराः स एव विडम्बो विक्षेपकस्तं प्रापितेन नीतेन बह्वी चासौ याचन-लज्जा च ताम्। लम्भितेन प्रापितेनेति द्वितीयं क्रियापदं स्वरूपार्थमात्रम्। प्रापितेन चटुकाकुविडम्बं बहुयाचनलज्जां चेति निर्देश एव विवक्षितार्थसिद्धेः। अथवा क्रियापद-द्वयनिर्देशेन कर्मद्वयस्य गौणमुख्यभावो निरस्तः ॥८४॥.

यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थिजनाय ।
सार्थनोक्तिविफलत्वविशङ्कात्रासमूर्च्छदपमृत्युचिकित्सा ॥८५॥.

प्रदेयं सुवर्णाद्युपनीय समर्प्यार्थिजनाय याचकलोकाय ब्राह्मणादिकाय यत् सलिलं जलं दीयते साऽर्थनारूपार्थना एव वा याऽसावुक्तिर्वचनरचना तस्या विफलत्वं निरर्थकत्वं तस्य विशङ्का भ्रान्तिस्ततस्त्रासो भयं, तेन मूर्च्छन् वर्धमानो योऽपमृत्युरकालमरणं, तस्य चिकित्सा प्रतीकारः। मूर्च्छायां हि शीतलजलसेक एव प्रथमः प्रतीकारः। अत्र सेति सर्वनाम्नो विधेयलिङ्गता ॥८५॥.

अर्थिने न तृणवद्धनमात्रं किं तु [1]जीवितमपि प्रतिपाद्यम् ।
एवमाह कुशवज्जलदायी द्रव्यदानविधिरुक्तिविदग्धः ॥८६॥.

द्रव्यदानस्य विधिः कल्पो द्रव्यदानविधिर्गवादिप्रतिपादनप्रक्रिया स एवमाहेति ब्रूते। कीदृशः? उक्तौ भाषणे विदग्धश्चतुरः। यो वचनभङ्गिशतं वेत्ति। कीदृशः सन्। कुशवज्जलदायी। कुशा विद्यन्ते यत्र तत् कुशवत्। एवंभूतं जलं ददातीत्येवं-शीलः। एवं कथमाह तद् दर्शयति। अर्थिने याचकाय तृणवत् तृणमिव धनमात्रं सुवर्णगवादिकमेव प्रतिपाद्यं देयं, किं तु जीवितं प्राणितमपि। अयमर्थः कुशवदि-त्यत्रायं वतुर्न भवति, किन्तु वतिप्रत्ययोऽयं श्लिष्टः प्रयुक्तोऽस्ति। कुशशब्देन च तृणमात्रं विव-[॥व.६॥]-क्षितमस्ति। कुशकाशं हि तृणेषु मुख्यं, किञ्च जलशब्देन जीवनम्। तेन च लक्षितलक्षणया प्राणितं प्राप्यते। जीवनशब्देन हि प्राणा उच्यन्त एव। अन्योऽप्युक्तिविदग्धो वक्रोक्तिश्लेषादिभङ्ग्या विवक्षितमर्थमाह। अत्र द्रव्यदानविधेर्दातृत्वमेव विवक्षितमुपचारान्न तु दापयितृत्वम्। सदा दापीति पाठः स्यात् ॥८६॥.

1. जा, ४. जीवनमपि.

पङ्कसङ्करविगर्हितमङ्गं न श्रियः कमलमाश्रयणाय ।
[1]अर्थिपाणिकमलं विमलं तद् वासवेश्म विदधीत सुधीस्तत् ॥८७॥

कर्दमसम्पर्कनिन्द्यमङ्गं [2]लक्ष्म्या निवासाय न योग्यम् । तत् कारणात् सुधीः पुमान् तस्याः श्रियो वेश्म वासगृहमर्थिनः पाणिमेव कमलं विदधीत करोतु । यतः कीदृशं तत् [3]विगतमलं पुण्यहेतुत्वात् पावनमित्यर्थः । पङ्कश्च कर्दम एनश्च मले श्रीपाप[4]विट्किट्टानि अर्थिपाणिकमलमनुधिवासवेश्म विधेयम् ॥८७॥

याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥८८॥

इयं भूमिरनन्ता तेनैकेन पुंसा परिमितदेहेन कृत्वाऽतिभारवती । तेन केनेत्याह । बत खेदे । यस्य जन्म सम्भवो याचमानस्य जनस्य यन्मानसः, तस्य वृत्तिः प्रवर्तनं, तस्याः पूरणाय समर्थनाय न भवति । यो जातः सन्नर्थिनां मनोरथं न पूरयति । नन्वन्येऽपि बहवः पदार्थास्ततोऽतिमहीयाँसस्तदतिभारहेतवः सन्तीति तत्र निषेधमाह । न द्रुमैर्बहुभिर्बहुजातीयैः, न ततोऽपि महद्भिर्गिरिभिः । न च ततोऽप्यतिमहद्भिः समुद्रैः अतिभारवतीति योज्यम् । भारो विद्यतेऽस्याः सा भारवती । [5]मत्वर्थीयेनैवातिशये लब्धेऽतिशब्दोऽत्र तन्महत्त्वाधिक्यार्थः । अत्रातिभारो गुणजनितो, न रूपजनितः ॥८८॥

मा धनानि कृपणः खलु जीवंस्तृष्णयार्पयतु जातु परस्मै ।
तत्र चैष कुरुते मम चित्रं यन्नु नार्पयति तानि मृतोऽपि ॥८९॥

कृपणः कदर्यः पुरुषो जीवन् सन् तृष्णया दीर्घाशया कृत्वा जातु कदाचिदपि खलु निश्चितं परस्मै ब्राह्मणादिकाय [6]पात्राय धनानि माऽर्पयतु, न ददातु । जीवितो हि तत्र तृष्णा कारणभूता हेतुभूता वा वर्तते । च पुनस्तत्रार्थे एष कृपणो ममाश्चर्यं रचयति । यन्मृतोऽपि नार्पयति, न ददाति, अर्थात् परस्मै । मृतस्य हि तृष्णाया निषेधकारणभूतया विश्लेषः । इति छलेनार्थः । तत्त्वतस्तु नार्पयति नृपायत्तानि करोति । मृतस्य हि प्रायो धनं नृपो गृह्णाति । नृपस्ये-
-[120.a]-मानि नार्पाणि, नार्पाणि करोति नार्पयति ॥८९॥

---

1. B. अर्थ- 2. B. लक्ष्मी. 3. B1. विमत- . 4. B1. -विविट्किट्टानि.
5. B. मत्वर्थी. 6. B1. पात्राव्य.

माममीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम् ।
यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥९०॥

अमीभिरिन्द्रादिभिर्जगत्यां भुवि वर्तमानं दातृजातं सकलान् दातॄनवमत्यावगणय्य मामेकं याचितवद्भिः प्रार्थनाविषयतां नीतवद्भिर्यद्यशः शुभ्रशब्दलक्षणं मयि विषये निवेशितं संस्थिरीकृतं तु पुनस्तदीयस्तस्य यशसः संबन्धी निष्क्रयः क्रयो मूल्यं कतमः प्रकृष्टः कोऽस्तु, अपि त्वस्य किञ्चन युक्तं मूल्यमात्रमपि युज्यते, न चेत् सम्यक् अत्र धरायां बहवो दातारः सन्ति, कोऽहं तदपेक्षयेति सत्पुरुषत्वादौद्धत्यपरिहारः। याचितवद्भिरिति भाविनि भूतवदुपचारः। याचितुमागतै-स्तैः स याचित एव ॥९०॥

लोक एष परलोकमुपेता हा विहाय निधने धनमेकः ।
इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ॥९१॥

अर्थी याचक एव बन्धुः स्वजन इत्येवमुदयद्दयचित्तः सन् खलु नूनं तद् धनमस्य लोकस्यामुं परलोकं निनीषति नेतुमिच्छति। उदयन्ती दया यत्र तदुदयद्दयं, एवं भूतं चित्तं यस्य स तथा। इति कथमित्याह। हा खेदे। एष लोको धनी जनो निधने पञ्चताकाले बहुक्लेशार्जितं धनं विहाय त्यक्त्वा खल्वेको-ऽपपरिच्छद एव परलोकं स्वर्गं गन्ता गमिष्यति। परलोकः प्रायेण स्वर्ग एव। यदेव ह्यर्थिने दीयते, तदेव किल तत्र प्राप्यते। अत्र च कर्मवशाल्लोक-प्राप्तिर्लोकाश्चोर्ध्वाधो वर्तमानास्तत्र कथं द्वयोर्दातृप्रतिग्रहीत्रोः सम्बन्ध इत्यादि सूक्ष्मार्थविचारोऽत्र कर्तुं न युज्यते। लोकैः खलु काव्ये प्रतीतिमात्ररमणीयत्वं वस्तुनोऽङ्गीक्रियते, न तर्ककर्कशविमर्शक्षमत्वम्। लोकाश्च काव्यव्यवहारप्रस्तावे विदग्धा एव गृह्यन्ते, ते च न कदाचिदपि पुरुपुरोडाशतर्ककर्कशविमर्शजडधिय इव वस्तुतत्त्वमपेक्षन्ते, किन्तु रसोत्कर्षदायिनीं वक्रोक्तिमेव न जातु। तथा वास्तवानुभवेन वस्तुतत्त्वं स्वदते यथा वक्रोक्त्या रुचिमिति ॥९१॥

दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि ।
साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ॥९२॥

पारलौकिकं परलोकसम्बन्धि। असीदत् सन्ततमुपचीयमानम्। कुसीदं वृद्धि-जीविकां कर्तुं दानपात्रमेवाधमर्णमृणिनं यदि परं साधुर्योग्यः पुरुषो(ष) एति

जानाति नान्यः। कैः कृत्वा? सुकृतैर्बहुभिः पुण्यैर्विना कुसीदमेवंविधं कर्तुमशा-
-धीर्मतिर्भवति। ननु दा-[120.b]-नपात्रशब्देन दाता प्रतिग्रहीता चोच्यते।
तन्न। अत्र दानपात्रं प्रतिग्रहीतैव। कीदृशं दानपात्रमेवाधमर्णमित्याह। इह भूमा-
-वेकग्राहि दिवि च कोटिगुणं दायि। अन्यो हि कृपणादिकोऽधमर्णो भूमा-
-वेकं गृहीत्वा द्विगुणादपि वर्षशतान्तेऽपि न ददाति। तत्रापि स्वल्पिहैव,
न तु परलोके। अयं तु दानपात्रलक्षणोऽधमर्णः स्वभावादिहैकं गृहीत्वा दिवि
कोटिगुणितं ददाति। तदपि तद्देयं न सीदत्यपि तु वर्धत एव। अन्योऽपि साधुः
कुशलो वणिक् कुसीदं कर्तुमधमर्णं जानाति परीक्षते। अधमर्णस्य परीक्षणपूर्वं
कुसीदसम्बन्धः क्रियते। न चेत् स भक्षयित्वा भूयो न ददाति। दानपात्रमनूद्यमधमर्णो
विधेयः। उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात्। प्रयोक्ता व्यवहारकः
ग्राहक ऋणी कुसीदं वृद्धिजीविकां ददातीति दायि ददातेर्णिनिः। कोटिगुणा
सञ्जाता यत्र तत् कोटिगुणितम्। अथवा कोटिर्गुणा यत्र तत् कोटिगुणम्।
कोटिगुणं करोतीतीन। कोटिगुण्यते स्मेति निष्ठान्तः। गुणास्तन्तवस्तत्सादृश्याद्-
-विशेषा अपि गुणाः गुणनं वर्तनम् ॥९२॥

एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम्।
अर्थिदुर्लभमवाप्य सहर्षान् याच्यमानमुखमुल्लसितश्रि ॥९३॥

एवमादि पूर्वोक्तं क्षणं विमृश्य, स नलस्तान् देवानब्रवीत्। कीदृशान्? प्रसन्नं मार्ग्यमाणस्य[1] मुखं लब्ध्वाऽतीव हृष्टान्। प्रायेण हि याच्यमानः पुमान् विच्छायमुखो भवति। अत एव कीदृशं याच्यमानमुखम्? प्रसन्नं सदर्थिनां दुर्लभम्। उल्लसितश्रीत्यनूधम्[2] ॥९३॥

नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः।
वीक्ष्य वः खलु तनूममृताशां दृङ्निमज्जनमुपैति सुधायाम् ॥९४॥

हे देवाः! सत्यं निश्चितं जनानां देहः कायोऽन्नजनितोऽदनीयवस्त्वारब्ध एव। यददनीयं वस्तु दुग्धभक्तादि स एव देह इत्यर्थः। ननु देहो जन्योऽन्नं जनकं तयोर्व्यतिभेदो विनिमयेन विशेषो वर्तते इत्याह। जन्यजनकयोर्व्यतिभेदो नास्ति। ननु कोऽत्र प्रतिज्ञायां हेतुरित्याह। खलु यस्मात् वो युष्माकममृताशां

---

1. B1. मार्गणस्य 2. B1. उच्छ्वसित-

सुधाधारां तनूं मूर्तिं वीक्ष्य, दृष्ट्वा दृग् दृष्टिः सुधायाममृते निमज्जनं ब्रुडनमुपैति। दृष्टिरर्थात् वक्तुरेव[1] यदि वा जन्यजनकयोर्व्यतिभेदो भवेत् तदा भवेद्दृग्दर्शने मम दृष्टिः सुधायां न निमज्जेत्। अत्रार्थे तु हर्षातिरेक एव हेतुः ॥९४॥

मत्तपः क्व नु तनु क्व फलं वा यूयमीक्षणपथं व्रजथेति। [121-a]

ईदृशं परिणमन्ति पुनर्न पूर्वपूरुषतपांसि जयन्ति ॥९५॥

मया जन्मप्रभृति यत् तपोऽर्जितं तत् फलमेतदिति विवक्षितस्यार्थस्यारुच्या प्राह। क्व ननु स्तोकतरं मम तपः। क्व वा क्व च तपसः फलमतिमहीयः। किं फलमित्याह। इत्येवं याचकत्वेन यूयमीक्षणपथं व्रजथ साक्षाद् भवथ। ननु तर्हि कस्य प्रभावोऽयमित्याह। ईदृशमनुभूयमानं यथा भवत्येवं परिणमन्ति, पर्यवस्यन्ति विवर्तमानानि सन्ति नोऽस्माकं पूर्वेषां पूर्वपुरुषाणां तपांसि शुभकर्माणि जयन्ति प्रभवन्ति। तेषां प्रभावोऽयमिति भावः। परिणामस्तद्रूपतापत्तिः। ईदृशमिति परिणमनक्रियाया व्याप्तिविवक्षया कर्मैव वा न तु विशेषणम्। परिणमन्तीति शतृङन्तात्[2] तपसां विशेषणात् प्रथमा बहुवचनम् ॥९५॥

प्रत्यतिष्ठिपदिलां खलु देवीं कर्म सर्वसहनव्रतजन्म।

यूयमप्यहह पूजनमस्या यन्निजैः सृजथ पादपयोजैः ॥९६॥

खलु नूनं सर्वसहनव्रतजन्म कर्म शुभलक्षणमिलां पृथ्वीं देवीं कृत्वा प्रत्यतिष्ठिपत् प्रतिष्ठापयति स्म। सर्वस्य खननकर्षणादेः सहनं तदेव व्रतं नियमस्तज्जनितं यच्छुभं कर्म तद्वशादियं भूमिः सुप्रतिष्ठा देवी सम्पन्नेत्यर्थः। अहह चित्रगर्भे हर्षे। यत् कारणात् यूयमपि विश्वपूज्या निजैश्चरणकमलैः कृत्वा खल्वस्याः पूजनमर्चनं सृजथ निर्मिमीध्वे। देवी हि कुसुमैः पूज्यते। देवानां धरागमनमेवं भङ्गिविशेषेण वदन् कवीश्वरः स्वीयां प्रौढिमसूचयत्। प्रत्यतिष्ठिपदिति तिष्ठतेरित्। देवाश्च प्रतिष्ठिता एव पूज्या भवन्ति। प्रतिष्ठा चात्र यथोचितधामसिद्धिः ॥९६॥

जीवितावधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात्।

तेन वश्चरणमर्चतु[3] सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक् ॥९७॥

हे देवाः! तेन वस्तुना कृत्वाऽयं मल्लक्षणो जनो युष्माकं पादान् पूजयतु।

---

1. A. वक्तु- 2. B. शतृङन्तात् 3. B. -नु

तेन केनेत्याह। इतो मत्तलक्षणात्मनुष्यपोतात् प्राणान् यावदधिकं वा भवेत्मनीषितं भवतां मनोगतं वर्तते। पुनः किं तु (नु) ब्रूत यूयमीदृशमद्भुतं किं वस्त्वस्तु भवतु। अस्त्विति प्राप्तकाले पञ्चमी, प्रार्थने वा। किमप्यधिकमित्यनेन दमयन्ती सूचिता॥९७॥

एवमुक्तवति वीतविशङ्के वीरसेनतनये विनयेन।
वक्रभावविषमामथ शक्रः कार्यकैतवगुरुर्गिरमूचे॥९८॥

नले निःशङ्कं विनयपुरःसरमेवमुक्त्वा निवृत्ते सति पश्चादिन्द्रो वाचमुवाच। कीदृशः? कर्तव्यच्छद्मन उपदेष्टा। अन्येऽपि हि प्रयोजनकपटं ततः पठन्ति। कीदृशीम्? गिरं वक्रभावेन कौटिल्येन विषमामुद्वेजयित्रीम्॥९८॥

पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो।
दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर! चिरस्य निरस्य॥९९॥

हे महीमिहिकांशो! भूचन्द्र! वयं दमयन्त्याः पाणिपीडनमहं विवाहोत्सवं कामयेमहि वाञ्छेम। तर्हि किमत्रेत्याह। हे निर्जितस्मर! तिरस्कृतकाम चिरस्य बहुकालं यावत् स्मरभीतिं कामभयं निरस्य त्यक्त्वाऽत्र दमयन्त्यामत्र कर्मणि वा नोऽस्माकं दूत्यं दूतकर्म कुरु। स्मरभीतिं निरस्येत्यादि सर्वं साभिप्रायम्॥९९॥

आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः।
किं ग्रहा दिवि न जाग्रति ते ते भास्करस्य कतमस्तुलास्ते॥१००॥

हे नल! अधिक्षिति क्षितौ शतमसङ्ख्या भूपा राजान आसते तिष्ठन्ति। किं तु तोयराशिः समुद्रस्त्वमसि, ते सर्वेऽपि कूपाः। तोयराशिरिव तोयराशिः, कूपा इव कूपाः। अस्यार्थस्य स्थिरीकरणार्थं सदृशं वस्त्वन्तरमुपन्यस्यति। दिवि ते ते प्रसिद्धा ग्रहा भौमाद्याः। किं न जाग्रति, अपि तु दीप्यन्त एव। तु पुनर्भास्करस्य सूर्यस्य कतमः प्रकारः कस्तुलास्ते उपमानमस्ति, अपि तु न कोऽपि। असीति त्वमित्यर्थेऽव्ययम्॥१००॥

विश्वदृश्वनयना वयमेव त्वद्गुणाम्बुधिमगाधमवेमः।
त्वामिहैवमनिवेश्य रहस्ये निर्वृतिं न हि लभेमहि सर्वे॥१०१॥

विश्वं पश्यन्तीत्येवंशीलानि विश्वदृश्वानि। एवं भूतानि नयनानि येषामिति विश्वदृश्वनयनाः। वयं त्वद्गुणाम्बुधिं भवद्गुणसमुद्रमेवागाधं गम्भीरमवेमो(?)वगच्छामः। अत एव एवं पूर्वोक्तयुक्त्या इहैतस्मिन् दमयन्तीविवाहलक्षणे रहस्ये गोप्येऽर्थेऽनि-

-वेश्याऽसंस्थाप्य वयं सर्वे चत्वारोऽपि निर्वृतिं सुखं निश्चततो न लभेमहि, न प्राप्नुयाम। गुणाम्बुधिमित्यनेन रहस्यगुप्तिशक्तिः सूचिता ॥१०१॥

शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः।
[1]क्षिप्नुरेनमृजुमाशु सपक्षं सायकं धनुरिवाजनि वक्रः ॥१०२॥

शक्रो वक्रोऽजनि, इन्द्रो मनसा कुटिलो जातः। किं करिष्णुः ? । एनं नलं सपक्षं ससहायं क्षिप्नुर्निराकरिष्णुर्निरसितुकामः। यतः कीदृशमेनं ऋजुं सरलबुद्धिम्। शक्रः कीदृशः ? । शुद्धवंशजनितोऽपि शुद्धे निर्दोषे वंशेऽन्वये जनितोऽपि। तथा गुणस्य शौर्यादेः स्थानतां भूमिं त्वमनुभवन्नुपलभमानोऽपि यत्र ह्येतद् [2]द्वयं भवति तस्य परं निरसितुं वक्रत्वं न युज्यते, तच्च दृश्यत इत्यपि शब्दो-[122.a]-ऽयं विरोधे। किमिव ? धनुरिव। यथा चापं वक्रं [भवति], कुटिलं भवति। कीदृशम् ? क्षिप्नुः क्षिपतीत्येवं-शीलं सत्, कं सायकं शरं, कीदृशं, सपक्षं सवाजं तथा ऋजुं शुद्धं, कीदृशं धनुः शुद्धाद्दृढ़ोः [3]सरलाद्वंशाद्वेणोर्जनितं कृतमर्थाद् धनुः शिल्पिना यदि वा शुद्धेन वंशेन जनितं सम्पादितम्। एवंभूतमपि तथा गुणस्य मौर्व्याः स्थानतामाधारतामनुभवत् प्राप्नुवदपि ॥१०२॥

तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः।
आचरत्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः ॥१०३॥

स नलस्तेन तेन पूर्वोक्तेन चातुर्भेण वचनेनैवेन्द्रस्योच्चैरधिकं कपटं छद्म वेद स्म जज्ञौ। अत एव पश्चात्(त्) तदर्हां वाचं व्यवहारयति स्म। हि यस्माद् वक्रेष्व-धकृत्वं न न्यायो भवति। अपि तु तत्र कौटिल्यमेव व्यवहारः ॥१०३॥

सेयमुच्चतरता दुरितानामन्यजन्मनि मयैव कृतानाम्।
युष्मदीयमपि या महिमानं जेतुमिच्छति कथापथपारम् ॥१०४॥

हे प्रभवः। सेयमीदृशी भवान्तरे मयैवार्जितानामपुण्यानामुद्दशता। याऽसौ भावत्कमपि महत्त्वमधक्षिचिकीर्षति। कीदृशम् ? कथायाः पन्थाः कथापथस्तस्य पारंपरप्रदेशः पार-वर्तित्वात् पारमेव। तेषु हि भग्नाशेषु प्रतिगतेषु तेषां लाघवं नलस्या[4]पयशः युक्त्या च तद् द्वयमत्र सूचितम् ॥१०४॥

धिग् चित्तमखिलस्य न कुर्यां धुर्यकार्यपरिपन्थि तु मौनम्।
ह्रीर्गिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवा[5]गपरास्ता ॥१०५॥

---

1. B. क्षिप्णु- 2. B. वयं 3. B. सरणाद्. 4. B1. चायशः. 5. B1. -परस्ता.

हे देवाः! यूयमखिलस्य लोकस्य चित्तमन्तःकरणं वित्त जानीत। तु पुनर्मौनं न कुर्याम्। यतः कीदृशं मौनम्? धुर्यस्य मुख्यस्य कार्यस्य परिपन्थि विरोधि मौने हि कृते प्रधानकर्तव्यविनाशो भवेत्। ननु नेति वचनाल्लज्जा भवेदित्याह। गिरा निषेधरूपया वरं ह्रीर्लज्जाऽस्तु। परस्य वाक् पुनरपरास्ताऽनिराकृता सती स्वीकृतैवाङ्गीकृतैवमास्तु। प्रार्थनाऽनन्तरम्। यदि तूष्णीं स्थीयते, तदा याचको जानाति, मम वचनमनेनाङ्गीकृतमिति। वरमित्यव्ययं शुभार्थम्। यथा 'वरं कूपशताद् वापी' इति ‖१०५‖

यन्मतौ विमलदर्पणिकायां संमुखस्थमखिलं खलु तत्त्वम्।

तेऽपि किं वितरथेदृशमाज्ञां या न यस्य सदृशी वितरीतुम् ‖१०६‖

हे देवाः! तेऽपि तादृशा यूयमीदृशमेवंरूपां तामाज्ञामादेशं तस्य मम कथं वितरथ यच्छथ। आज्ञा यस्य वितरीतुं दातुं न सदृशी, न योग्या, ते के इत्याह। येषां मतौ बुद्धावेव विमलदर्पणिकायां स्वच्छादर्शिकायाम्। खलु नूनमखिलं तत्त्वं वस्तुजातं संमुखस्थमभि-[ 122 b ]-मुखवर्ति निर्मले ह्यादर्शे सर्वं वस्तुजातमभि-मुखवर्ति दृश्यते। भवन्तः सर्वदर्शिनो ममाशयं यथावद्विदन्त्येवेति भावः ‖१०६‖

यामि यामिह वरीतुमहो तद्दूततां तु करवाणि कथं वः।

ईदृशां न महतां बत जाता वञ्चने मम तृणस्य घृणापि ‖१०७‖

अहो चित्रे! अहमिह यां वरीतुं यामि विवाहयितुं प्रस्थितोऽस्मि। तु पुनस्तस्या दूततां सन्देशहरतां वो युष्मभ्यं कथं करवाणि। कावत्वा अपि त्वस्यार्थस्य नेयं कालप्राप्तिः भवतु। वो युष्माकमीदृशां प्रत्यक्षत उपलभ्यमानानां महतामीश्वराणां मम तृणरूपस्य वञ्चने विप्रलम्भे विषये सति घृणा लज्जाऽपि न जाता, अपि तु तुच्छतरस्य मम वञ्चने प्रवृत्तानां तत्रभवतां महतां त्रपा युज्यते। पापादिभयं तावद् दूरे तिष्ठतु। लज्जाऽपि तावद् युज्यते इत्यपि शब्दार्थः। वो युष्माक-मित्युत्तरार्धे दर्शितः ‖१०७‖

उद्भ्रमामि विरहान्मुहुरस्या मोहमेमि च मुहूर्तमहं यः।

ब्रूत वः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः ‖१०८‖

योऽहमस्या राजकन्याया विरहात् मुहुर्मुहुरुद्भ्रमामि भूताविष्ट इव चेष्टे। मुहूर्तं क्षणं मोहं वैचित्त्यमेमि विन्दे। ब्रूत यूयमेव कथयत। सोऽहमीदृगवस्थ एवं दशो वो युष्माकं रहस्यं गोपनीयमर्थं रक्षितुं गोपयितुं कथं प्रभवितास्मि शक्ष्यामि। उद्भ्रमान्

मोहाच्चावश्यं रहस्यप्रकाशनं भवति ॥१०८॥

यां मनोरथमयीं हृदि कृत्वा यः स्वपिम्यथ कथं स तदग्रे।
भावगुप्तिमवलम्बितुमीशे दुर्जया हि विषया विदुषापि ॥१०९॥

योऽहं यां नृपपुत्रीं मनोरथमयीं, वाञ्छितार्थरूपां हृदि कृत्वा, मनसि निवेश्य स्वपिमि, निद्रामि। अथ पश्चात् तां प्रत्यक्षां प्राप्य, तदग्रे तस्याः पुरो भावस्याशयस्य गुप्तौ रक्षणमवलम्बितुं कर्तुं कथमीशे। केन प्रकारेण प्रभवामि। कस्या अपि तु सर्वथाऽयमर्थो दुर्घट एव। हि यस्मात् विषया रूपादयो विदुषापि दुर्जया दुःखेन जीयन्ते। विषयाः खलु विद्वांसमपि स्ववशं नयन्ति ॥१०९॥

यामिकाननुपमृद्य च मादृक् तां निरीक्षितुमपि क्षमते कः।
रक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारी ॥११०॥

यामिकान् प्राहरिकाननुमृद्येतस्ततोऽवसंघृष्यासंचूर्ण्य मादृक् सुन्दरः कः पुरुषस्तां द्रष्टुमपि शक्नोति। अपि तु न कोऽपि। तर्हि तानवमृद्य सा द्रष्टव्येत्याह। रक्षिणां लक्षं शतसहस्री, तस्या जयेन चण्डं भीषणं चरित्रं वृत्तं यस्य तस्मिन्नपि कुमारी राजकन्या क्व विश्वसिति विश्रम्भं धत्ते। अपि तु न क्वापि। तत्र कन्याऽन्तःपु-[१२३·व]-रे रक्षका लक्षसङ्ख्याः सन्ति। अहं च तान् सर्वानपि जेतुं शक्तः। परं तथाविधात्तारं मां मानुषमायं दानवं राक्षसं वा बुध्यमाना सा विश्वासं नैव कुर्यादित्यर्थः ॥११०॥

आदधीचि किल दातृकृतार्थं प्राणमात्रपणसीम यशो यत्।
आददे कथमथ प्रियया तत् प्राणतः शतगुणेन पणेन ॥१११॥

किञ्च तद्यशोऽहं प्रियया दमयन्त्यैव पणेन मौल्येन कथमाददे केन प्रकारेण क्रीणामि। कीदृशेन? प्राणेभ्यः सकाशाच्छतगुणेन। शतं गुणा वर्तन्ते यत्र तच्छतगुणं तेन। तत् किमित्याह। यत्किल दातृकृतार्थं दातृभिः कृतोऽर्थो मूल्यं यस्य। तत् कीदृक्? प्राणा एव प्राणमात्रम्। स एव पणो मूल्यं सीमा यस्येति प्राणेभ्योऽधिकं यशसो मूल्यं नास्त्येव। असवः परमं मूल्यं तस्येत्यर्थः। कथं दातृकृतार्थमित्याह। आदधीचि दधीचिनामानं मुनिं यावत्। दधीचिना कित्नास्थीनि वज्रादिशस्त्रनिर्माणाय देवेभ्यो दत्वा यशोऽर्जितं, शिबिना तदर्थं मांसं कपोतरक्षायै श्येनाय दत्तं, जीमूतवाहननाम्ना विद्याधरपतिना शङ्खचूडं

सर्पं रक्षितुमिच्छता गरुडाय जीवो दत्तो यशस एव कृते। यदि चाहं प्राणेभ्यो दूरतरमतिरिक्तेन प्रेयसीमूल्येन यशः क्रीणामि, तदा मम व्यवहारवेदिता भ्रश्येत। आर्तिवशात् स पादेनार्ध्यर्धेन[1] वा मूल्येन वस्तु क्रीयते। तदुपरि नैव कथञ्चित् कदाचिदपि ॥१११॥

अर्थना मयि भवद्भिरिवास्यै कर्तुमर्हति मयापि भवत्सु।

भीमजार्थपरयाचनवाचे यूयमेव गुरवः करणीयाः ॥११२॥

मयापि कृत्या अर्थना याचना अस्यै दमयन्त्यर्थमर्हति, युक्ता भवति। केषु विषये? भवत्सु। कैरिव? भवद्भिरिव। क्व? मयि विषये। कस्यै? अस्यै। यथा भवद्भिरहं दमयन्तीं याचितस्तथा मया भवन्तः। प्रतीपमेतां याचिता इति काकुगर्भमिदं वाक्यम्। ननु त्वं राजा याचने नैवार्ह इत्याह। भीमजार्थी दमयन्तीप्रयोजना या परयाचनलक्षणा वाक्, तस्यै यूयं भवन्त एव मया गुरव उपाध्यायाः कर्तव्याः। भवन्तो हि दमयन्तीहेतुपरार्थनवचने ष्वतीवाधीतिनस्ततोऽहमेतदवाप्तये भवत एव चतुरो गुरून् करिष्यामि। यो हि यत्र विद्यायां प्रवीणः, सा तस्मादेवाधीयते। भवन्तो देवाः सन्तो यदि स्थितिं भजन्ति, ततो मनुष्योऽहं विशिष्य भजामीत्यर्थः ॥११२॥

अर्थिताः प्रथमतो दमयन्तीं यूयमन्वहमुपास्य मया यत्।

ह्रीर्न चेत् व्यतियतामपि तद्वः सा ममापि सुतरां न तदस्तु ॥११३॥

हे देवाः! मया यद्यूयमादौ भैमीं याचिताः। किं कृत्वा? प्रतिदिवसमाराध्य, तदपि प्रथमा-[१२३-७]-राधनपुरःसरं तस्या याचनं व्यतियतां परिवर्तयतां वो युष्माकं चेद्यदि न ह्रीर्नैव लज्जाऽस्ति। तत् तर्हि ममापि सा ह्रीर्नितरां नास्तु, मा भवतु। नलेन हि प्रथमं ते याचिताः। सम्प्रति ते नलं याचन्तेतरामिति व्यत्ययः। व्यतियतामितीण् शतृडन्तः। 'व्यत्ययः स्याद् विपर्ययः' ॥११३॥

कुण्डिनेन्द्रसुतया किल पूर्वं मां वरीतुमुररीकृतमास्ते।

व्रीडमेष्यति परं मयि दृष्टे स्वीकरिष्यति न सा खलु युष्मान् ॥११४॥

किलेत्याप्तोक्तौ। आप्तश्चात्र हंसः। भैम्या मां विवाहयितुं प्रथममङ्गीकृतं विद्यते। अत एव मयि प्रत्यक्षीकृते सति सा केवलं लज्जां प्राप्स्यति। खलु नूनं युष्मान्नादरिष्यते। व्रीडशब्दोऽस्त्रियामप्यस्ति। 'ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम्' [इत्यमरः] ॥११४॥

---

1. B1. -र्धेन.

तत्प्रसीदत विधत्त न खेदं दूत्यमत्यसदृशं हि ममेदम् ।
हास्यतैव सुलभा न तु साध्यं तद्विधित्सुभिरनौपयिकेन ॥११५॥

तदित्युपसंहारे । किं बहुनोक्तेन प्रसादं कुरुत यूयं खेदं प्रार्थनाश्रमं प्रार्थनावैफल्याद् वा श्रमं न कुरुत । हि यस्मादिदं दमयन्तीविषयं दूत्यं दूतकर्म ममातिशयेनासदृश-मुचितं न भवति । किञ्च तद् दूत्यमनौपयिकेनानुपायेन विधातुमिच्छुभिर्भवद्भिर्हास्य-तोपहासविषयतैव सुलभा सुप्रापा, न तु साध्यं फलं दमयन्तीप्राप्तिलक्षणम् । हास्यत इति हास्यः पुरुषस्तस्य भावः । हासोऽत्र विडम्बनम् । उपाय एवौपयिकम् ॥११५॥

ईदृशानि गदितानि तदानीमाकलय्य स नलस्य बलारिः ।
शंसति स्म किमपि स्मयमानः स्वानुगाननविलोकनलोलः ॥११६॥

स बलस्य दैत्यस्यारिरिन्द्रस्तदा नैषधस्येदृशि वचांसि विमृश्य किमपि मनाक् स्मितं कुर्वंस्तथा निजानुचरास्यदर्शनचपलः सन् शशंसाब्रवीत् । स्वस्यानुगा अग्नि-यम,वरुणास्तेषामाननानि तेषां प्रत्येकं विलोकनवशाल्लोलोऽस्थिरः । श्रुतं भवद्भिरस्य भाषितमिति मनसिकृत्य स्मितपुरःसरं तन्मुखानि वीक्ष्योवाचेत्यर्थः ॥११६॥

नाभ्यधायि नृपते! भवतेदं रोहिणीरमणवंशभुवैव[1] ।
लज्जते न रसना तव वाम्यादर्थिषु[2] स्वयमुरीकृतकाम्या ॥११७॥

किमुवाच तदाह- हे राजन् ! सोमवंशजेनैव त्वयैतन्नोक्तम् । तव जिह्वा वाम्यात् प्रतीपभावात् न त्रपते । यतः कीदृशी? याचकेषु विषये आत्मनैवाङ्गीकृताभिलाषा । अर्थिकाम्यस्वीकारस्तु पूर्वं दर्शित एव । काम्यत इति काम्यम् । स्वरादेः वामौ वल्गु प्रतीपौ द्वौ पूर्वार्धार्थोत्तरार्धार्थयोः परस्परसापेक्षत्वात् न वाक्यभेदो दूषणम्। एवमन्यत्र 'नृपते' इति सम्बोधनम् । रोहिणीर-[१८४.a]-मणवंशभुवेति विशेषणं च साभिप्रायम् । अन्योऽपि राजा सत्यसंधो भवति, विशेषतः सोमवंशजः ॥११७॥

भङ्गुरं न वितथं न कथं वा जीवलोकमवलोकयसीमम् ।
येन धर्मयशसी परिहातुं धीरहो चलति वीर! तवापि ॥११८॥

हे नल! त्वमिमं जीवलोकं मनुष्यादिप्राणीजनं (-प्राणिजातं) भङ्गुरं भङ्गप्रकृतिं किं[3] नावलोकयसि । वितथं मिथ्या वा किं नावलोकयसि । प्राणिजने हि भङ्गुरत्वं वितथत्वं चावश्यकं प्रपञ्चस्वरूपत्वात् । येन हेतुना पुण्यकीर्ति परित्यक्तुं हे धीर विद्वन् !

---

1. B1.-भुवेन. 2. B.-दर्दिषु. 3. B1. om. वितथं ---- नावलोकयसि ।

भवतोऽपि मतिश्चलत्यस्थिरीभवति प्रवर्तते। यदि हि भवान् जीवलोकस्थितिमुक्तप्रकारां जानीयात् तदा नैवं पुण्यकीर्तिं परित्यक्तुं प्रवर्तेत ॥११८॥

क: कुलेऽजनि जगन्मुकुटे व: प्रार्थकेप्सितमपूरि न येन।

इन्दुरादिरजनिष्ट कलङ्की कष्टमत्र स भवानपि मा भूत् ॥११९॥

हे नल! युष्माकं कुले विश्वभूषणे स क: पुमान् जातो, येन याचकानां कामो न पूरित:? अपि तु सर्वैरपि भवत् पूर्वजै: सर्वेऽर्थिन: कृतार्थी कृता:। त्वं च तेभ्योऽन्यथैव प्रवर्तितुकामोऽसि। तथा च तव न युज्यत इति मनसि कृत्याह। अत्र वंशे (शा) आदि: प्रथम एव वंशकर्ता सोम: स्थिरकलङ्को जात:। कष्टमहृदात्र द्वितीयो भवान् स इति कलङ्की मा भवतु। अस्मासु हि भग्नाशेषु त्वत्त: प्रतिगतेषु कलङ्कस्त्वयि चिरस्थाय्येव ॥११९॥

यापदृष्टिरपि या मुखमुद्रा याचमानमनु या च न तुष्टि:।

त्वादृशस्य सकल: स कलङ्क: शीतभासि शशक: परमेक:[1] ॥१२०॥

चन्द्रकलङ्कादेतत् कलङ्कस्य विशेषं दर्शयति। किञ्च हे नल! त्वादृशस्योत्तमकुल-प्रसूतस्य सात्त्विकस्य सकल: स कलङ्क: समग्रं तल्लाञ्छनम्। तत्त्वलस्त्वपवाद एव शीतभासि चन्द्रे परं केवलमेकोऽद्वितीय: शशको जीवविशेष: कलङ्क इति संबन्ध:। स क इत्याह। याचमानमर्थिनमनुलक्षीकृत्य याऽसावपगता दृष्टिर्विरुद्धाव-[2]लोकनं या च [3]मुखमुद्रा मौनं या च न तुष्टिर्हर्ष:। सर्वनाम्नो [4]विधीयमानाऽनूद्य-मानलिङ्गग्रहणे कामचार इति न्यायात् स कलङ्क इति विधेयलिङ्गता। कलङ्कोऽङ्कापवाद्य: ॥१२०॥

नाक्षराणि पठता किमपाठि प्रस्मृतो हि भवता पठितोऽपि।

इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकार: ॥१२१॥

खलु यस्मादेतावन्तं कालं भवन्तमुद्दिश्य नकारो वर्ण इत्थमनेन प्रकारेणार्थिनां च यस्य मार्गणगणस्य संशय: सन्देह: सैव दोला प्रेङ्खा, तत्र खेलनं क्रीडनं चकार। इत्थं कथमित्याह। भवता त्वया अक्षराणि पठता सता, नकार: किं नापाठि, न पठित:। अथवा पठितोऽपि प्रस्मृत इति वि-[124-6]-स्मृति: (त:)। प्रपूर्वं स्मरतिर्विस्मृतौ। अयं श्लोकार्थो नलेन सार्धं यथाकथञ्चित् संबन्धनीय:। दोलाया गतागतं प्रसिद्धमत्राभिनयरूपम्। तस्मात् त्वमस्मानुद्दिश्य निषेधं मा कार्षीरिति भाव: ॥१२१॥

---

1. ~~B~~. परमङ्क: 2. B1-लोकनीया च. 3. B. om. मुख- 4. B. विधूयमाना-

अब्रवीत्तमनलः वच नलेहं लब्धमुज्झसि यशः शशिकल्पम्।
कल्पवृक्षपतिमर्थिजनेन नाप कोऽपि शतमन्युमिहान्यः ॥१२२॥

वह्निस्तं नलमुवाच। किं तदित्याह। हे नल! इदमीदृशं शशिकल्पं चन्द्रसदृशं लब्धं हस्तागतं यशः। क्वोज्झसि त्यजसि। यत एवं कल्पवृक्षाणां पतिं शतमन्युं शतयज्ञमर्थिनं याचकमन्यस्त्वदितरः कोऽपि नोपलेभे। कोऽपि ब्रह्माऽपि वा। कल्पवृक्षपतिं शतमन्युमिति द्वयं दानाधिक्यसूचकम् ॥१२२॥

न व्यहन्यत कदापि मुदं यः स्वःसदामुपनयन्नभिलाषः।
तत्पदे त्वदभिषेककृतां नः स त्यजत्वसमतामदमद्य ॥१२३॥

यः स्वः सदां देवानामभिलाषः कामो मुदं प्रीतिमुपनयन्नुपढौकयन् सन्, न व्यहन्यत, न विहतो, न निष्फलो बभूव। देवा हि यच्चिन्तयन्ति तत् सिध्यति। सोऽस्माकं नभःसदामद्यासमतामदमसादृश्यदर्पं त्यजतु। कीदृशानाम्? तत्पदे तस्याभिलाषस्य स्थाने, त्वदभिषेककृतां तवाभिषेको निवेशनं तस्य कृतस्तेषाम्। इदानीं हि दमयन्तीमस्मदभिलाषो(षं) नास्मभ्यं दातुं शक्तस्तस्माद् भवांस्तस्य स्थाने प्रतिष्ठितः। इदानीं त्वमेवास्मभ्यं दमयन्तीं दातुं समर्थ इत्यर्थः। स्वःसदामिति सामान्येनोक्तं न इत्यत्र तु स्वःसत्त्वं विशेषोक्तम्। देवानां सर्वेषामप्यभिलाषो विफलो न भवतीति मिथ्या न चेत्, वयमपि देवा अस्माकं किमिति विफलो भवति। यदि त्वयभिलाषोऽस्माकं दमयन्तीं प्रापयेत्, तदा न वयं भवन्तं याचेम ॥१२३॥

अब्रवीदथ यमस्तमहृष्टं वीरसेनकुलदीप! तमस्त्वाम्।
यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेः सदृशं ते ॥१२४॥

अनन्तरं नलं विषण्णं सन्तं यमोऽब्रवीत्। किमुवाचेत्याह— हे वीरसेनकुलदीप! तमो[1]ऽन्धकारः यत् किमप्यधिकतरं त्वामभिभवितुमिच्छति। तत्किं ते तव चन्द्रवंशवसतेः सदृशं योग्यम्। अपि तु नैव। वीरसेनकुलस्य दीप इव दीपः प्रकाशकत्वात्। चन्द्रवंशे वसतिः स्थितिर्यस्येति। अनेन विशेषणद्वयेन विशिष्टपुरुषस्योभयरूपस्यापि तमसोऽभिभवो न युक्तः। तमो हि [2]मोहान्धकारश्च ॥१२४॥

रोहणः किमपि यः कठिनानां कामधेनुरपि या पशुरेव।
नैतयोरपि वृथाऽभवदर्थी हा विधित्सुरसि वत्स! किमेतत् ॥१२५॥

---

1. ४. तमः कर्तृ, 2. B1. मोहोऽन्धंकारश्च.

हे पुत्र! यो [१२५.८] रोहणाख्यो गिरिः कठिनानामचेतनानां मध्ये किमपि वस्तु तस्य हि कठिनानामेव मध्ये प्रशंसा। किञ्च या कामधेनुरपि पशुरेव। सा कामान् पूरयतु। तथापि पशुः कठिनः स्वभावादचेतनः। पशुश्च विवेकशून्यः। एतयोरप्यर्थी निरर्थको नाभूद्वतस्त्वं सचेतनशिरोमणिर्हेयोपादेयविवेचनचतुरोऽपि चतुरोऽस्मान् दिक्पालीनर्थिनो वृथा कुर्वन् हा कष्टं किं विधित्सुरसि, कात्वा अपि तु कुत्सितं कर्तुमिच्छसीत्यर्थः ॥१२५॥

याचितश्चिरयति क्व नु वीर प्राणने क्षणमपि प्रतिभूः कः।
शंसति द्विनयनी हठनिद्रां द्राग् निमेषमिषघूर्णनपूर्णा ॥१२६॥

नु सम्भावयामि वीरो दानशौण्डः पुरुषो याचितः क्व चिरयति कालक्षेपं करोति, अपि तु न क्वापि। ननु तत्र विलम्बे किं दूषणमित्याह। प्राणने श्वसने जीवनविषये क्षणमपि कः प्रतिभूर्लग्नकोऽपि तु न कोऽपि। जीवनं हि श्वसनमात्रम्। तस्य च क्षणमपि स्थैर्ये निश्चयो नास्ति। यतः द्विनयनी नेत्रद्वयी घूर्णनेन भ्रमणेन पूर्णा सती द्राग् झटिति हठनिद्रां मरणलक्षणां शंसति। यथाऽयं क्षणिको मत्सङ्कोचस्तथा चिर-स्थाय्यप्यचिराद् भविष्यतीति सूचयति। द्वयोर्नयनयोः समाहारो द्विनयनी ॥१२६॥

अभ्रपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदभाजि।
स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्घनसङ्घे ॥१२७॥

अत्र तावत् प्रथमतः स्थूलपक्ष एव ~~व्याख्यान्ते~~ व्याक्रियते। घनो निरन्तरः सङ्घः सार्थस्तस्मिन् विषये खलु नूनं म्लानिर्विच्छायता तत् कारणादुल्लसत्युद्भवति। ततः कुत इत्याह। यत् कारणात् स्तोककस्याल्पकस्य चञ्चुपुटेन संकुचितदीनवदनेन विमुखता पराङ्मुखताऽभाजि प्राप्ता। केन? सार्थोऽस्यास्तीति सार्थी। तेन सार्थिना सङ्घिना तर्हि स घनसङ्घः कृपणो भविष्यतीत्याशङ्क्याह। किं कर्तुमिच्छति? घनसङ्घः शीतं दारिद्र्यता-पहारि अभ्रपुष्पं खपुष्पमपि दातुमिच्छति। आदौ तावदभ्रमसत् तस्य पुष्पमेव नास्ति, तस्य गुणिनोऽभावे तत्र कथं गुणः। तस्मादत्यन्ताभावोऽत्र वस्तुनः प्रदर्शितः। यः सार्थः सर्वथा-ऽसदपि वस्तु ददाति। स च कस्मैचिन्निजसङ्गचारिणे दीनमुखायाऽल्पकाय स्तोकाभि-लाषिणे कार्पण्यं भजते। तत्रावश्यं लज्जावशात् पश्चात् म्लानिरुल्लसत्येव। तत्त्वतस्तु खलु नूनं घनसङ्घे मेघवृन्दे म्लानिः कालिका स्तोककस्य चातकस्य चञ्चुपुटेन चोटिसंपुटेन अर्थिना याचकेन। सा तादृशी विः पक्षी तस्य मुखं, तस्य भावो विमुखता। अभ्रपुष्पं जलं

[125-b] शीतं शिशिरम्। अत्रापि पक्षे छलोक्तिलब्धमलानिसम्भावने विमुखता पराङ्मुखत्वैव हेतुः। अयं च श्लेषार्थः सुबुद्धिभिर्यथायुक्ति संयोजनीयः। ग्रन्थगौरवभयात् मया प्रसृत्य न व्याख्यातः ॥ १२७ ॥

उचितानुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य ।
कीर्तिरेव भवतां प्रियदारा दाननीरझरमौक्तिकहारा ॥१२८॥

वरुणोऽपि सारभूतं वर्णमेनं नलमूचे। किं कृत्वा ? हस्तमुत्क्षिप्य। किमुवाचेत्याह। हे नल! त्वत्सदृशानां कीर्तिरेव प्रिया दाराः कलत्रम्। कीदृशी कीर्तिः ? दानोदक-प्रवाह एव मौक्तिकानां हारः सरो यस्याः सा। अथवा भवतामिति गौरवप्रतिपादनाय नलापेक्षयैव बहुवचनम्। राज्ञां हि प्रियकलत्राणि विशेषान्मौक्तिकहारभूषणानि भवन्ति ॥१२८॥

चर्म वर्म किल यस्य नभेद्यं यस्य वज्रमयमस्थि च तौ चेत्।
स्थायिनाविह न कर्णदधीची तन्न धर्ममवधीरय धीर! ॥१२९॥

हे धीर! विद्वन्, तद्धेतोः पुण्यं माऽवगणय। ततः कुत इत्याह। यत् कारणात् तौ कर्ण-दधीचीनामानौ दानशौण्डाविह भुवि स्थिरतरौ न जाताविति तयोर्दानजनितयशःशरीर-रक्षणं सूचितम्। तौ कावित्याह। यस्य कर्णस्य चर्म त्वगेव वर्म किल नभेद्यमभूत्। यस्य च वज्रमयमस्थ्यभूत्। किलेत्यागमे। वज्रेण निर्वृत्तं वज्रमयमिति। अत्र पूर्वं वज्रं दधीचेरस्थीनि चेति न विनिश्चिनुमः। वज्रनिर्माणं हि दधीचेरस्थितः श्रूयते। अथवा वज्रं प्रस्तुतं यत्रेति वज्रधर्मोऽत्र विवक्षितो न रूपम्। इदं यद् वज्रसंज्ञं वस्तु, तस्य गुणास्तत्र प्रस्तुता अभूवन् ॥१२९॥

अद्य यावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ ।
आस्थिताऽवितथतागुणपाशस्त्वादृशा स विदुषा दुरपासः ॥१३०॥

हे नल! आसमन्तात् स्थितो निश्चलीभूतोऽवितथता सत्यतैव गुणो वटस्तन्तुमयस्तस्य पाशो बन्धनोपकरणभूतः प्रसिद्धः। स त्वादृशा प्रशस्येन पुरुषेण दुरपासो दुरुद्ग्रथनीयः। सः क इत्याह। येन निबद्धौ संयतौ नियमितौ बलिर्दानवो विन्ध्यश्चाद्रिरेतावद्य यावदपि अद्यतनं दिनं मर्यादीकृत्यापि प्रचलितुमस्थिरीभवितुं न प्रभू, न शक्तौ। बलेर्नियमनं वामनात् विन्ध्यस्य चागस्त्यादागमे। गुणः शणादिमयस्तद्बद्धो बली यथा कथञ्चिदपि भवादृशः स्वल्वात्मानं मोचयितुमीष्टे। न तु सत्यत्वगुणबद्धः। त्वया चास्मन्मनोरथसमर्थनं प्रतिज्ञातमस्ति। तस्मात् भवान् प्रचलि-[126-a]-तुकामोऽप्यस्मत्तः प्रचलितुं न लभेत इत्यर्थः। विन्ध्ये द्विविधं प्रचलनं मूर्तिगतं मनोगतं च। बलौ तु मनोगतमेव।

पश बन्धने । पशनं पाशो बन्धः । न विद्यते पाशो बन्धनं यस्यासावपाशः । दुःखेनापाशो दुरपाशो दुरबन्धनः । विदुषेति साभिप्रायं मूर्खः । सत्याच्चलत्यपि विद्वान्न चलत्येव ॥१३०॥

प्रेयसी जितसुधांशुमुखश्रीर्या न मुञ्चति दिगन्तगतापि ।
भङ्गिसङ्गमकुरङ्गदृगर्थे कः कदर्थयति तामपि कीर्तिम् ॥१३१॥

तां तादृशीमपि कीर्तिं कः कदर्थयति विनाशयति । 1भङ्गी सङ्गमो यस्याः सा चासौ कुरङ्गदृक् सुन्दरी स एवार्थः प्रयोजनं तन्निमित्तम् । तां कामित्याह । या प्रेयसी सतामतीव रुचिता तथा । जितः सुधांशुर्यया सा एवंभूता मुखश्रीः प्रारम्भशोभा यस्याः सा तथा । या च दिशामन्तानवधीन् गता प्राप्ताऽपि न मुञ्चति पुरुषमित्यनुभवसिद्धम् । अन्या हि दमयन्ती भङ्गिसङ्गमा । यतो गृहाङ्गणगताऽपि मुञ्चत्येव । प्रेयसी प्रियतमा चन्द्रसममुखकान्तिश्च साऽप्यस्ति । व्यतिरेकोऽलङ्कारः । भङ्गो विद्यते यस्यासौ भङ्गी । अवश्यं भज्यत इति वा णिनिः । कुरङ्गदृगत्रापातमात्रेण स्त्रीमात्रम् । तत्त्वतस्तु दमयन्त्येवात्र पर्यवस्यति । कुत्सितोऽर्थः कदर्थस्तं करोति कदर्थयति ॥१३१॥

यान्परं प्रति परेऽर्थयितारस्तेऽपि यं वयमहो स पुनस्त्वम् ।
नैव नः खलु मनोरथमात्रं शूर ! पूरय दिशोऽपि यशोभिः ॥१३२॥

हे नल ! शूर ! दानशौण्ड स त्वं पुनर्नोऽस्माकं मनोरथमात्रं खलु नैव पूरय । अपि तु यशोभिः कृत्वा दिशोऽपि पूरय भर । खलु वाक्यालङ्कारे । स क इत्याह । तेऽपि वयं यं प्रत्यर्थयितारो याचकाः । ते क इत्याह । यान्प्रति परं केवलं परेऽन्येऽर्थयितारो याचकाः । नैव नो मनोरथमात्रं पूरयेत्यत्र पूरणे करणं गम्यम् । दिशां तु पूरणे यशांसि प्रत्यक्षम् । अथवोभयत्रापि यशांस्येव करणम् । यशांसि यशोहेतुभूतोऽर्थः ॥१३२॥

अर्थितां त्वयि गतेषु सुरेषु म्लानदानजनितोरुयशःश्रीः ।
अद्य पाण्डु गगनं सुरशाखी केवलेन कुसुमेन विधत्ताम् ॥१३३॥

हे नल ! कल्पवृक्षोऽद्यैकेन पुष्पेणैव खं सितं करोतु । ननु पूर्वं दानयशसाऽप्ययं नभः सितीचकार । तदस्य क्व गतमित्याह । म्लाना विच्छायीभूता दानजनिता वितरणोद्भूता । उर्वी महती यशसः श्रीः सम्पद्यस्य स तथा । केषु ? सत्सु सुरेष्वस्मासु त्वयि विषये याचकतां प्राप्तेषु सत्सु । यदि हि स कामितप्रदो 1भवेत् तदाऽस्मभ्यं दमयन्तीं प्रदद्यात् । न च दत्तवान् । ततः स दातृत्वात् वियुक्तः ॥१३३॥

1. B. स्यात् ।

प्रवसते भरता-[१२८.७]-र्जुनवैन्यवत् स्मृतिधृतोऽपि नल! त्वमभीष्टदः।
स्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम् ॥१३४॥

हे नल! त्वं ध्यातमात्रोऽपि वाञ्छितप्रदः। कस्मै? प्रवसते प्रवासोद्यताय पुरुषाय। किं वत्? भरतस्यार्जुनस्य वैन्यस्य भरतार्जुनवैन्यास्तद्वत् ते तथा। एतेषां हि स्मरणं प्रस्थाने शुभम्। एवं सति यदि त्वं निजस्थानस्य वैफल्यं सम्भावयसि, तर्हि निखिलं मङ्गलं स्वस्तिवाचनदधिवन्दनादि सर्वं निरर्थकमेव। स्वयमसिद्धं हि कथं परस्य सिद्धिकरणे समर्थं भवेत्। तर्हि सर्वं मङ्गलाचरणमर्थवाद एवेत्यर्थः। मङ्गलहेतुत्वात् मङ्गलं मङ्गल्यमित्यर्थः ॥१३४॥

इष्टिं नः प्रति ते प्रतिश्रुतिरभूद्याद्य स्वराह्लादिनी
धर्मार्थां सृज तां श्रुतिप्रतिभटीकृत्यान्वितारव्यापराम्।
त्वत्(त्)कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशनात्
द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥१३५॥

हे नल! नोऽस्माकमिष्टिमिच्छां प्रति या ते भवतः प्रतिश्रुतिरङ्गीकृतिरभूत्। कीदृशी? स्वः स्वर्गमाह्लादयतीत्येवंशीला स्वराह्लादिनी, तां प्रतिश्रुतिं धर्मार्थां पुण्यप्रयोजनां सृज, कुरु। अन्विताख्यापरां सृज गुणद्वयविशिष्टां कुरु। किं कृत्वा? श्रुतिप्रतिभटीकृत्य अन्वितार्थमनुगतार्थमाख्यापदं प्रतिश्रुतिरिति नामपदं यस्याः सा तथा ताम्। श्रुतिर्हि वेदः, सा च देवानामिष्टिं यागं प्रतिभवति। स्वरैश्चोदात्तादि-भिराह्लादिनी भवति। प्रतिश्रुतिश्च श्रुतिसदृशी द्वितीयाश्रुतिरुच्यते। तस्याश्च धर्मद्वयमस्ति। अस्माकमिष्टिं प्रतिभवनं स्वराह्लादनं च। अत्र चार्थे छलोक्तिरेव हेतुः। इयं चानुगतार्थनामा तदा भवति, यदा धर्मार्था स्यात्। यतो धर्मः श्रुति-विधिः। किञ्च श्रुतिः सत्या। एनामपि तथा कुरु। त्वं चेद्दमयन्त्यर्थमस्मद् दूत्यं करोषि। तदा ते प्रतिश्रुतिर्धर्मार्था स्यात् सत्या च। धर्मायेयं धर्मार्थेत्यस्वपद-समासः। वेदपक्षे तु धर्म एवार्थः प्रयोजनं यस्याः सा धर्मार्था। इष्टिर्याग इच्छा च। प्रतिश्रुतिरङ्गीकारः प्रतिवेदश्च। स्वः स्वर्ग एवेन्द्रादयो देवाः। धर्मो यमो वा तदर्थे सिद्धे शक्रादीनामर्थः सिद्ध एव। अत्र च द्वयं विधेयं धर्मार्थत्वमन्विताख्या-परत्वं च। केचित् तु धर्मार्थां सतीमन्विताख्यापरां सृजेति धर्मार्थत्वमनूद्यमाहु-रन्विताख्यापरत्वं तु विधेयम्। तथापि प्रतिश्रुतिरन्विताख्यापरा भवत्येव। निजमङ्गीकृत्य-कृतं परिपालयेति वाक्यार्थः। नन्वेवं सति मम किं फलमित्याह।

तव कीर्तिस्तु त्रैलोक्यं पवित्रयन्ती विशदयन्ती सती द्रव्याणां दर्पण-[१२१.a]-टादीनां शितिः कृष्णः, पीतो, गौरो, लोहितो, रक्तो, हरिन्नील इति यानि नामानि तैः सह विशेषणविशेष्यभावेन योऽन्वयः संबन्धस्तं लुम्पतु च्छिनत्त्वित्याशीः। कस्मात् ? शुभ्रस्य सितस्याद्वयमेक एव शुभ्रोऽस्तीत्येकमात्रभावस्तस्यादेशनं स्थापनं तस्मात्। तव कीर्त्या हि विश्वे धवलिते कृष्णादीनामभावः। आदेशो हि शत्रुवत् प्रसङ्गेन भवति। यथाऽस्तेः स्थाने भूर्भुवः स्थानेवचिरिति। सर्वानन्यान्वर्णानुद्वास्य, तेषां स्थाने शुभ्र एवैकोऽवतिष्ठतामित्यर्थः ॥१३५॥

यं प्रासूत सहस्रपादुद्भवत् पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्वृच्छति।
एतस्योत्तरमध नः समजनि त्वत्तेजसां लङ्घने
साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन् भानुमान् ॥१३६॥

हे नल! एतस्य पूर्वपक्षस्योत्तरपक्षोऽद्य भानुमान् सूर्यः समजनि सञ्जातः। किं कुर्वन् ? साहस्रैः सहस्रसङ्ख्याकैरप्यङ्घ्रिभिः पादैः पङ्गुः श्रोणोऽभिव्यक्ती भवन्, प्रकटो भवन्, सन्। क्व ? लङ्घनेऽतिक्रमणनिमित्तम्। केषाम् ? त्वत् तेजसां भवत् प्रतापानाम्। सूर्यो हि सहस्रेणापि पादैर्भवत् प्रतापलङ्घने पङ्गुर्व्यक्तिभूत इति प्रतापा-तिशयः। एतस्य कस्येत्याह। यं सहस्रचरणोऽजनयत् स च्छायातनयः शनिः पादेन खञ्जः खोडः। केन प्रकारेणोद्भूतः। किल यस्मात् सुतः पुत्रः पितुर्जनकस्य सादृश्यं साम्यमन्वृच्छति प्राप्नोतीति। चरणविकलपुत्रोऽवश्यं चरणविकलो भवति। पादेन खञ्ज इति कुत्सितेऽङ्गे तृतीया। अन्वृच्छतीति[1] ऋधातो रूपम् ॥१३६॥

इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार।
अङ्गीकारं गतेऽस्मिन्नमरपरिवृढः सम्भृतानन्दमूचे
भूयादन्तर्धिसिद्धेरनुविहितभवच्चिन्तता यत्र तत्र ॥१३७॥

राजा देवचतुष्टय्यास्ताः पूर्वोक्ताः प्रियवाक्यमिश्रा वाच इतीत्थमाकर्ण्य भैम्यभी(भिलाष)कोऽपि[2] सन् बलादारोपितं दूत्यमेव भारं गुरुतरं वहनीयं वस्तु बभार, दध्रे। अस्मिंश्च राजनि प्रतिज्ञां प्राप्ते सति खेराट् सञ्चित-प्रहर्षं यथा स्यादेवमूचे। किमब्रवीदित्याह। अन्तर्धिरपवारणमदृश्यीभावस्तस्य

1. B1, 8 ऋच्छधातो. 2. B1, 8 भैम्यभीको—

सिद्धिर्निष्पत्तिस्तस्या यत्र तत्र सर्वत्रानुविहितभवच्चित्तताऽनुकूलत्वन्मनस्ता भूयाद-
-स्त्वित्याशीः। यत्र यत्र भवानदृश्यीभवितुमिच्छति, तत्र पूर्णेच्छो भवता-
-दित्यर्थः। अन्तर्धानसिद्धिस्तव मानसमनुकरोत्विति यावत्। अन्योऽपि यदि
किमपि वस्त्वन्तरं विधित्सुरपि गुर्वादिना बला-[127.b]-दारोपितं
भारमङ्गीकारपुरःसरं बिभर्ति। तदा तत् प्रधानभूतः स पुमान् सहर्षं
तमाशीर्वचोऽमूलैर्यथाकाममभिवर्षतीति शुभम्॥१३७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तस्य श्रीविजयप्रशस्तिरचनातातस्य नव्ये महा-
-काव्ये चारुणि [1]वैरसेनिचरिते सर्गोऽगमत्पञ्चमः॥१३८॥
(नैषधीयचरिते).

श्रीविजयप्रशस्ते रचनानिर्मितिस्तस्यास्तातस्य जनकस्य विजयप्रशस्तेः
कर्तुरित्यर्थः॥१३८॥

शाण्डिल्यनाममुनिवंशकरीरकस्य
श्रीधीरधीरतनयस्य गदाधरस्य।
कृत्तौ सुधामधुनि नैषध[2]दीपिकायां
सर्गस्तु पञ्चम इति प्रतिपूर्यते स्म॥५॥

1. B1., D. वैरसेनिचरिते.
2. B1. -दीपिकायां.